K. Venkatarama
Sastrigal
Tamil

ஸ்ரீ

THE

# MINOR POEMS

OF

**NILAKANTHA DIKSHITA**

*Author of 'Sivalilarnava' etc.*

**SRIRANGAM:**

SRI VANI VILAS PRESS.

1911.

॥ श्रीः ॥

# ॥ लघुकाव्यानि ॥

श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य
चतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजि
श्रीमदप्पयदीक्षितपौत्रेण शिवलीलार्णवा-
द्यनेकप्रबन्धप्रणेत्रा महाकवि
श्रीनीलकण्ठदीक्षितेन
विरचितानि ।

श्रीरङ्गम्
श्रीवाणीविलासमुद्रायन्त्रालयः ।
१९११.

॥ श्रीः ॥

# ॥ विषयसूची ॥

# ॥ कलिविडम्बनम् ॥

॥ श्रीः ॥

# ॥ कलिविडम्बनम् ॥

न भेत्तव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥ १ ॥

असंभ्रमो विलज्जत्वमवज्ञा प्रतिवादिनि ।
हासो राज्ञः स्तवश्चेति पञ्चैते जयहेतवः ॥ २ ॥

उच्चैरुद्घोष्य जेतव्यं मध्यस्थश्चेदपण्डितः ।
पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥ ३ ॥

लाभो हेतुर्धनं साध्यं दृष्टान्तस्तु पुरोहितः ।
आत्मोत्कर्षो निगमनमनुमानेष्वयं विधिः ॥ ४ ॥

अभ्यास्यं लज्जमानेन तत्त्वं जिज्ञासुना चिरम् ।
जिगीषुणा ह्रियं त्यक्त्वा कार्यः कोलाहलो महान् ॥

पाठनैर्ग्रन्थनिर्माणैः प्रतिष्ठा तावदाप्यते ।
एवं च तथ्यव्युत्पत्तिरायुषोऽन्ते भवेन्न वा ॥ ६ ॥

स्तोतारः के भविष्यन्ति मूर्खस्य जगतीतले ।
न स्तौति चेत्स्वयं च स्वं कदा तस्यास्तु निर्वृतिः ॥ ७ ॥

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति
इति पाठयतां ग्रन्थे काठिन्यं कुत्र वर्तते ।

अगतित्वमतिश्रद्धा ज्ञानाभासेन तृप्तता ।
त्रयः शिष्यगुणा ह्येते मूर्खाचार्यस्य भाग्यजाः ॥ ९ ॥

यदि न क्वापि विद्यायां सर्वथा क्रमते मतिः ।
मान्त्रिकास्तु भविष्यामो योगिनो यतयोऽपि वा ॥

अविलम्बेन संसिद्धौ मान्त्रिकैराप्यते यशः ।
विलम्बे कर्मबाहुल्यं विख्याप्यावाप्यते धनम् ॥ ११ ॥

सुखं सुखिषु दुःखं च जीवनं दुःखशालिषु ।
अनुग्रहायते येषां ते धन्याः खलु मान्त्रिकाः ॥ १२ ॥

यावदज्ञानतो मौनमाचारो वा विलक्षणः ।
तावन्माहात्म्यरूपेण पर्यवस्यति मान्त्रिके ॥ १?

चारान्विचार्य दैवज्ञैर्वक्तव्यं भूभुजां फलम् ।
ग्रहचारपरिज्ञानं तेषामावश्यिकं यतः ॥ १४ ॥

पुत्र इत्येव पितरि कन्यकेत्येव मातरि
गर्भप्रश्नेषु कथयन्दैवज्ञो विजयी भवेत् ॥ १५ ॥

आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्जनैः ।
जीवन्तो बहु मन्यन्ते मृताः प्रक्ष्यन्ति कं पुनः ॥ १६ ॥

सर्वं कोटिद्वयोपेतं सर्वं कालद्वयावधि ।
सर्वं व्यामिश्रमिव च वक्तव्यं दैवचिन्तकैः ॥ १७ ॥

निर्धनानां धनावाप्तिं धनिनामधिकं धनम् ।
ब्रुवाणाः सर्वथा ग्राह्या लोकैर्ज्यौतिषिका जनाः ॥ १८ ॥

शतस्य लाभे ताम्बूलं सहस्रस्य तु भोजनम् ।
दैवज्ञानामुपालम्भो नित्यः कार्यविपर्यये ॥ १९ ॥

अपि सागरपर्यन्ता विचेतव्या वसुंधरा ।
देशो ह्यरत्निमात्रोऽपि नास्ति दैवज्ञवर्जितः ॥ २० ॥

वारान्केचिद्ग्रहान्केचित्केचिदृक्षाणि जानते ।
त्रितयं ये विजानन्ति ते वाचस्पतयः स्वयम् ॥ २१ ॥

नैमित्तिकाः स्वप्नदृशो देवतोपासका इति ।
निसर्गशत्रवः सृष्टा दैवज्ञानाममी त्रयः ॥ २२ ॥

स्वस्थैरसाध्यरोगैश्च जन्तुभिर्नास्ति किंचन ।
कातरा दीर्घरोगाश्च भिषजां भाग्यहेतवः ॥ २३ ॥

नातिधैर्यं प्रदातव्यं नातिभीतिश्च रोगिणि ।
नैश्चिन्त्यान्नादिमे दानं नैराश्यादेव नान्तिमे ॥ २४ ॥

भैषज्यं तु यथाकामं पथ्यं तु कठिनं वदेत् ।
आरोग्यं वैद्यमाहात्म्यादन्यथात्वमपथ्यतः ॥ २५ ॥

निदानं रोगनामानि साम्यासाम्ये चिकित्सितम् ।
सर्वमप्युपदेक्ष्यन्ति रोगिणः सदने स्त्रियः ॥ २६ ॥

जृम्भमाणेषु रोगेषु म्रियमाणेषु जन्तुषु ।
रोगतत्त्वेषु शनकैर्व्युत्पद्यन्ते चिकित्सकाः ॥ २७ ॥

प्रवर्तनार्थमारम्भे मध्ये त्वौषधहेतवे ।
बहुमानार्थमन्ते च जिहीर्षन्ति चिकित्सकाः ॥

लिप्समानेषु वैद्येषु चिरादासाद्य रोगिणम् ।
दायादाः संप्ररोहन्ति दैवज्ञा मान्त्रिका अपि ॥ २९ ॥

रोगस्योपक्रमे सान्त्वं मध्ये किंचिद्धनव्ययः ।
शनैरनादरः शान्तौ स्नातो वैद्यं न पश्यति ॥ ३० ॥

दैवज्ञत्वं मान्त्रिकता भैषज्यं चाटुकौशलम् ।
एकैकमर्थलाभाय द्वित्रियोगस्तु दुर्लभः ॥ ३१ ॥

अनृतं चाटुवादश्च धनयोगो महानयम् ।
सत्यं वैदुष्यमित्येष योगो दारिद्र्यकारकः ॥ ३२ ॥

कातर्यं दुर्विनीतत्वं कार्पण्यमविवेकताम् ।
सर्वं मार्जन्ति कवयः शालीनां मुष्टिकिंकराः ॥ ३३ ॥

न कारणमपेक्षन्ते कवयः स्तोतुमुद्यताः ।
किंचिदस्तुवतां तेषां जिह्वा फुरफुरायते ॥ ३४ ॥

स्तुतं स्तुवन्ति कवयो न स्वतो गुणदर्शिनः ।
कीटः कश्चिदलिर्नाम कियती तत्र वर्णना ॥ ३५ ॥

एकैव कविता पुंसां ग्रामायाश्वाय हस्तिने ।
अन्ततोऽन्नाय वस्त्राय ताम्बूलाय च कल्पते ॥ ३६ ॥

शब्दाख्यमपरं ब्रह्म संदर्भेण परिष्कृतम् ।
विक्रीयते कतिपयैर्वृथान्यैर्विनियुज्यते ॥ ३७ ॥

वर्णयन्ति नराभासान्वाणीं लब्ध्वापि ये जनाः ।
लब्ध्वापि कामधेनुं ते लाङ्गले विनियुञ्जते ॥ ३८ ॥

प्रशंसन्तो नराभासान्प्रलपन्तोऽन्यथान्यथा ।
कथं तरन्तु कवयः कामपारम्यवादिनः ॥ ३९ ॥

यत्संदर्भे यदुल्लेखे यद्वयङ्कथे निभृतं मनः ।
समाधेरपि तज्ज्यायः शंकरो यदि वर्ण्यते ॥ ४० ॥

गृहिणी भगिनी तस्याः श्वशुरौ श्याल इत्यपि ।
प्राणिनां कलिना सृष्टाः पञ्च प्राणा इमेऽपरे ॥ ४१ ॥

जामातरो भागिनेया मातुला दारबान्धवाः ।
अज्ञाता एव गृहिणां भक्षयन्त्याखुवद्गृहे ॥ ४२ ॥

मातुलस्य बलं माता जामातुर्दुहिता बलम् ।
श्वशुरस्य बलं भार्या स्वयमेवातिथेर्बलम् ॥ ४३ ॥

जामातुर्वक्रता तावद्यावच्छ्यालस्य बालता ।
प्रबुध्यमाने सारल्यं प्रबुद्धेऽस्मिन्पलायनम् ॥ ४४ ॥

भार्या ज्येष्ठा शिशुः श्यालः श्वश्रूः स्वातन्त्र्यवर्तिनि ।
श्वशुरस्तु प्रवासीति जामातुर्भाग्यधोरणी ॥ ४५ ॥

भूषणैर्वसनैः पात्रैः पुत्राणामुपलालनैः ।
सकृदागत्य गच्छन्ती कन्या निर्मार्ष्टि मन्दिरम् ॥

गृहिणी स्वजनं वक्ति शुष्काहारं मिताशनम् ।
पतिपक्ष्यांस्तु बह्वाशान्क्षीरपांस्तस्करानपि ॥ ४७ ॥

भार्ये द्वे पुत्रशालिन्यौ भगिनी पतिवर्जिता ।
अश्रान्तकलहो नाम योगोऽयं गृहमेधिनाम् ॥ ४८ ॥

भार्ये द्वे बहवः पुत्रा दारिद्र्यं रोगसंभवः ।
जीर्णौ च मातापितरावेकैकं नरकाधिकम् ॥ ४९ ॥

स्मृते सीदन्ति गात्राणि दृष्टे प्रज्ञा विनश्यति ।
अहो महदिदं भूतमुत्तमर्णाभिशब्दितम् ॥ ५० ॥

अन्तकोऽपि हि जन्तूनामन्तकालमपेक्षते ।
न कालनियमः कश्चिदुत्तमर्णस्य विद्यते ॥ ५१ ॥

न पश्यामो मुखे दंष्ट्रां न पाशं वा कराञ्चले ।
उत्तमर्णमवेक्ष्यैव तथाप्युद्विजते मनः ॥ ५२ ॥

शत्रौ सान्त्वं प्रतीकारः सर्वरोगेषु भेषजम् ।
मृत्योर्मृत्युंजयध्यानं दारिद्र्ये तु न किंचन ॥ ५३ ॥

शक्तिं करोति संचारे शीतोष्णे मर्षयत्यपि ।
दीपयत्युदरे वह्निं दारिद्र्यं परमौषधम् ॥ ५४ ॥

गिरं स्खलन्तीं मीलन्तीं दृष्टिं पादौ विसंस्फुटौ ।
प्रोत्साहयति याच्ञायां राजाज्ञेव दरिद्रता ॥ ५५ ॥

जीर्यन्ति राजविद्वेषा जीर्यन्त्यविहितान्यपि ।
आर्किंचन्यबलाढ्यानामन्ततोऽश्मापि जीर्यति ॥ ५६ ॥

नास्य चोरा न पिशुना न दायादा न पार्थिवाः ।
दैन्यं राज्यादपि ज्यायो यदि तत्त्वं प्रबुध्यते ॥ ५७ ॥

प्रकाशयत्यहंकारं प्रवर्तयति तस्करान् ।
प्रोत्साहयति दायादांल्लक्ष्मीः किंचिदुपस्थिता ॥ ५८ ॥

विडम्बयन्ति ये नित्यं विदग्धान्धनिनो जनाः ।
त एव तु विडम्ब्यन्ते श्रिया किंचिदुपेक्षिताः ॥ ५९ ॥

प्रामाण्यबुद्धिः स्तोत्रेषु देवताबुद्धिरात्मनि ।
कीटबुद्धिर्मनुष्येषु नूतनायाः श्रियः फलम् ॥ ६० ॥

शृण्वन्त एव पृच्छन्ति पश्यन्तोऽपि न जानते ।
बिडम्बनानि धनिकाः स्तोत्राणीत्येव मन्वते ॥ ६१ ॥

आवृत्य श्रीमदेनान्धानन्योन्यकृतसंविद: ।
स्वैरं हसन्ति पार्श्वस्था बालोन्मत्तपिशाचवत् ॥ ६२ ॥

स्तोतव्यै: स्तूयते नित्यं सेवनीयैश्च सेव्यते ।
न बिभेति न जिह्रेति तथापि धनिको जन: ॥ ६३ ॥

क्षणमात्रं ग्रहावेशो याममात्रं सुरामद: ।
लक्ष्मीमदस्तु मूर्खाणामादेहमनुवर्तते ॥ ६४ ॥

श्रीर्मासमर्धमासं वा चेष्टित्वा विनिवर्तते ।
विकारस्तु तदारब्धो नित्यं लशुनगन्धवत् ॥ ६५ ॥

कण्ठे मद: कोद्रवजो हृदि ताम्बूलजो मद: ।
लक्ष्मीमदस्तु सर्वाङ्गे पुत्रदारमुखेष्वपि ॥ ६६ ॥

यत्रासीदस्ति वा लक्ष्मीस्तत्रोन्माद: प्रवर्तताम् ।
कुलेऽप्यवतरत्येष कुष्ठापस्मारवत्कथम् ॥ ६७ ॥

अध्यापयन्ति शास्त्राणि तृणीकुर्वन्ति पण्डितान् ।
विस्मारयन्ति जातिं स्वां वराटा: पञ्चषा: करे ॥ ६८ ॥

बिभर्तु भृत्यान्धनिको दत्तां वा देयमर्थिषु ।
यावद्याचकसाधर्म्यं तावल्लोको न मृष्यति ॥ ६९ ॥

धनभारो हि लोकस्य पिशुनैरेव धार्यते ।
कथं ते तं लघूकर्तुं यतन्तेऽपरथा स्वतः ॥ ७० ॥

श्रमानुरूपं पिशुने किमुपक्रियते नृपैः ।
द्विगुणं त्रिगुणं चैव कृतान्तो लालयिष्यति ॥ ७१ ॥

गोकर्णे भद्रकर्णे च जपो दुष्कर्मनाशनः ।
राजकर्णेजपः सद्यः सर्वकर्मविनाशनः ॥ ७२ ॥

न स्वार्थे किंचिदिच्छन्ति न प्रेर्यन्ते च केनचित् ।
परार्थेषु प्रवर्तन्ते शठाः सन्तश्च तुल्यवत् ॥ ७३ ॥

कालान्तरे ह्यनर्थाय गृध्रो गेहोपरि स्थितः ।
खलो गृहसमीपस्थः सद्योऽनर्थाय देहिनाम् ॥ ७४ ॥

शुष्कोपवासो धर्मेषु भैषज्येषु च लङ्घनम् ।
जपयज्ञश्च यज्ञेषु रोचते लोभशालिनाम् ॥ ७५ ॥

किं वक्ष्यतीति धनिको यावदुद्विजते मनः ।
किं प्रक्ष्यतीति लुब्धोऽपि तावदुद्विजते ततः ॥ ७६ ॥

सर्वमातिथ्यशास्त्रार्थं साक्षात्कुर्वन्ति लोभिनः ।
भिक्षाकबलमेकैकं ये हि पश्यन्ति मेरुवत् ॥ ७७ ॥

धनपालः पिशाचो हि दत्ते स्वामिन्युपस्थिते ।
धनलुब्धः पिशाचस्तु न कस्मैचन दित्सति ॥ ७८ ॥

दातारोऽर्थिभिरर्थ्यन्ते दातृभिः पुनरर्थिनः ।
कर्तृकर्मव्यतीहारादहो निम्नोन्नतं कियत् ॥ ७९ ॥

स्वस्मिन्नसति नार्थस्य रक्षकः संभवेदिति ।
निश्चित्यैव स्वयमपि भुङ्क्ते लुब्धः कथंचन ॥ ८० ॥

प्रस्थास्यमानः प्रविशेत्प्रतिष्ठेत दिने दिने ।
विचित्रानुल्लिखेद्विघ्नांस्तिष्ठासुरतिथिश्चिरम् ॥ ८१ ॥

प्रदीयते विदुष्येकं कवौ दश नटे शतम् ।
सहस्रं दाम्भिके लोके श्रोत्रिये तु न किंचन ॥ ८२ ॥

घटकं सम्यगाराध्य वैराग्यं परमं वहेत् ।
तावदर्थाः प्रसिध्यन्ति यावच्चापलमावृतम् ॥ ८३ ॥

एकतः सर्वशास्त्राणि तुलसीकाष्ठमेकतः ।
वक्तव्यं किंचिदित्युक्तं वस्तुतस्तुलसी परा ॥ ८४ ॥

विस्मृतं वाहटेनेदं तुलस्याः पठता गुणान् ।
विश्वसंमोहिनी वित्तदायिनीति गुणद्वयम् ॥ ८५ ॥

कौपीनं भसितालेपो दर्भा रुद्राक्षमालिका ।
मौनमेकासिका चेति मूर्खसंजीवनानि षट् ॥ ८६ ॥

वासः पुण्येषु तीर्थेषु प्रसिद्धश्च मृतो गुरुः ।
अध्यापनावृत्तयश्च कीर्तनीया धनार्थिभिः ॥ ८७ ॥

मन्त्रभ्रंशे संप्रदायः प्रयोगश्च्युतसंस्कृतौ ।
देशधर्मस्त्वनाचारे पृच्छतां सिद्धमुत्तरम् ॥ ८८ ॥

यथा जानन्ति बहवो यथा वक्ष्यन्ति दातरि ।
तथा धर्मं चरेत्सर्वं न वृथा किंचिदाचरेत् ॥ ८९ ॥

सदा जपपटो हस्ते मध्ये मध्येऽक्षिमीलनम् ।
सर्वं ब्रह्मेति वादश्च सद्यः प्रत्ययहेतवः ॥ ९० ॥

आमध्याह्नं नदीवासः समाजे देवतार्चनम् ।
सततं शुचिवेषश्चेत्येतद्दम्भस्य जीवितम् ॥ ९१ ॥

तावद्दीर्घं नित्यकर्म यावत्स्याद्द्रष्टृमेलनम् ।
तावत्संक्षिप्यते सर्वं यावद्द्रष्टा न विद्यते ॥ ९२ ॥

आनन्दबाष्परोमाञ्चौ यस्य स्वेच्छावशंवदौ ।
किं तस्य साधनैरन्यैः किंकराः सर्वपार्थिवाः ॥ ९३ ॥

दण्ड्यमाना विकुर्वन्ति लाल्यमानास्ततस्तराम् ।
दुर्जनानामतो न्याय्यं दूरादेव विसर्जनम् ॥ ९४ ॥

अदानमीषद्दानं च किंचित्कोपाय दुर्धियाम् ।
संपूर्णदानं प्रकृतिर्विरामो वैरकारणम् ॥ ९५ ॥

ज्यायानसंस्तवो दुष्टैरीर्ष्यायै संस्तवः पुनः ।
अपत्यसंबन्धविधिस्त्वनर्थायैव केवलम् ॥ ९६ ॥

ज्ञातेयं ज्ञानहीनत्वं पिशुनत्वं दरिद्रता ।
मिलन्ति यदि चत्वारि तद्दिशेऽपि नमो नमः ॥ ९७ ॥

परच्छिद्रेषु हृदयं परवार्तासु च श्रवः ।
परमर्मसु वाचं च खलानामसृजद्विधिः ॥ ९८ ॥

विषेण पुच्छलग्नेन वृश्चिकः प्राणिनामिव ।
कलिना दशमांशेन सर्वः कालोऽपि दारुणः ॥ ९९ ॥

यत्र भार्यागिरो वेदा यत्र धर्मोऽर्थसाधनम् ।
यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नमः ॥ १०० ॥

काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ।
कालकालं प्रपन्नानां कालः किं नः करिष्यति ॥१०१॥

कविना नीलकण्ठेन कलेरेतद्विडम्बनम् ।
रचितं विदुषां प्रीत्यै राजास्थानानुमोदनम् ॥ १०२ ॥

इति श्रीनीलकण्ठदीक्षितविरचितं
कलिविडम्बनं संपूर्णम् ॥

# सभारञ्जनशतकम्

॥ श्रीः ॥

# ॥ सभारञ्जनशतकम् ॥

षड्दर्शनीपरिज्ञानमण्डितैरिव पण्डितैः ।
स्तम्भैश्चित्रैर्वितानैश्च सभा किमवभासते ॥ १ ॥

सन्ति सर्वविधा मर्त्या न सन्त्येके विपश्चितः ।
असूर्येणेव लोकेन किं तेन विषयेण नः ॥ २ ॥

उद्यन्तु शतमादित्या उद्यन्तु शतमिन्दवः ।
न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः ॥ ३ ॥

बहुभ्यो बहु बोद्धव्यं बहुधा बहुवासरान् ।
बहुकल्पशतस्थायि लब्धुं बहुविधं यशः ॥ ४ ॥

पाषाणाः सर्व एवैते पद्मरागेषु को गुणः ।
प्रकाशः कश्चिदत्रास्ते परत्र स न विद्यते ॥ ५ ॥

जात्यन्धा जातिबधिरा जातिमूकाश्च ते जनाः ।
सम्यगाराधिता यैर्न सन्तो विज्ञानसिन्धवः ॥ ६ ॥

अपि मानुष्यकं लब्ध्वा भवन्ति ज्ञानिनो न ये ।
पशुतैव वरं तेषां प्रत्यवायाप्रवर्तनात् ॥ ७ ॥

किं परोक्षं किमध्यक्षं किं लभ्यं किं नु दुर्लभम् ।
सर्वमैन्द्रियिकं वस्तु सर्वं करगतं सताम् ॥ ८ ॥

स्थावरा जङ्गमा मर्त्या ब्राह्मणा मुनयः सुराः ।
शिव इत्यप्यमी भेदाश्चिदुत्कर्षनिबन्धनाः ॥ ९ ॥

विद्युज्जलधरो वृष्टिश्चन्द्रार्कौ सागरा इति ।
सर्वमद्भुतमज्ञानां जानतां तु न किंचन ॥ १० ॥

तत्र तत्र स्थितैर्ज्ञानकरणैरिव विग्रहः ।
विद्वद्भिः शोभते देशस्तैर्विहीनस्त्वमङ्गलः ॥ ११ ॥

अमलीमसमच्छिद्रमक्रेयमतिसुन्दरम् ।
अदेयमप्रतिग्राह्यमहो ज्ञानं महाधनम् ॥ १२ ॥

संदर्भशक्तिहीनानां शब्दाभ्यासो वृथाश्रमः ।
मुग्धानि लब्ध्वा पुष्पाणि मुण्डितः किं करिष्यति ॥

शास्त्रेषु दुर्ग्रहोऽप्यर्थः स्वदते कविसूक्तिषु ।
दृश्यं करगतं रत्नं दारुणं फणिमूर्धनि ॥ १४ ॥

आञ्जस्यं व्यवहाराणामार्जवं परमं धियाम् ।
स्वातन्त्र्यमपि तन्त्रेषु सूते काव्यपरिश्रमः ॥ १५ ॥

साहित्यविद्याहीनानां सर्वशास्त्रविदामपि ।
समाजं परिपश्यन्ति समजं बुद्धिशालिनः ॥ १६ ॥

अशिक्षितानां काव्येषु शास्त्राभ्यासो निरर्थकः ।
किमस्त्यनुपनीतस्य वाजपेयादिभिर्मखैः ॥ १७ ॥

अन्धा विद्वज्जनैर्हीना मूका कविभिरुज्झिता ।
बधिरा गायकैर्हीना सभा भवति भूभृताम् ॥ १८ ॥

साहित्यादपि शास्त्राणि विशिष्टानीति चेन्मतिः ।
ततोऽपि वेदाध्ययनं ततोऽपि शिवकीर्तनम् ॥ १९ ॥

सन्त्वश्वाः सन्तु मातङ्गाः सन्तु योधाः सहस्रशः ।
नरेन्द्राणां विशेषेण न विना कविना यशः ॥ २० ॥

काणाः कमलपत्राक्षाः कदर्याः कल्पशाखिनः ।
कातरा विक्रमादित्याः कविदृग्गोचरं गताः ॥ २१ ॥

पारदेश्यं वृथादास्यं पञ्चानामेकदारता ।
पाण्डवानामभूत्कीर्त्यै पाराशर्यकवेर्गिरा ॥ २२ ॥

जानाते यन्न चन्द्रार्कौ जानते यन्न योगिनः ।
जानीते यन्न भर्गोऽपि तज्जानाति कविः स्वयम् ॥ २३ ॥

सर्वासामपि विद्यानां साहित्यं हि कवेः पदम् ।
साधारण्येऽपि यत्रैव सारस्वतपदं ध्रुवम् ॥ २४ ॥

नादातव्यं न दातव्यं न कर्तव्यं च किंचन ।
सान्त्वमेकं प्रयोक्तव्यं सर्वं तस्य वशे जगत् ॥ २५ ॥

नामरूपात्मकं विश्वं दृश्यते यदिदं द्विधा ।
तत्राद्यस्य कविर्वेधा द्वितीयस्य चतुर्मुखः ॥ २६ ॥

अग्निष्टोमे किमुक्थ्ये किं किमाज्ये किं रथन्तरे ।
स्तुतिरित्येव हृष्यन्ति सर्वज्ञा अपि देवताः ॥ २७ ॥

न जातिरूपकर्माणि दृश्यन्ते मृदुभाषिणि ।
पक्षिणो मलिनास्तत्र परपुष्टा निदर्शनम् ॥ २८ ॥

अर्थहीनोऽपि मधुरः शब्दो लोकप्रियंकरः ।
वीणावेणुमृदङ्गादीन्यत्रोदाहरणानि नः ॥ २९ ॥

जिघांसन्तोऽपि पशवो रुदन्तोऽपि स्तनंधयाः ।
घ्नन्तोऽपि रिपवो युद्धे वशमायान्ति सान्त्वतः ॥ ३० ॥

दातुः प्रतिग्रहीतुश्च यौ हस्तावुत्तराधरौ ।
तयोरप्यौत्तराधर्यं ताभ्यामेवोपपद्यते ॥ ३१ ॥

अमर्त्याः सन्तु मर्त्या वा चेतनाः सन्त्वचेतनाः ।
दानमेव पुरस्कृत्य स्तूयन्ते भुवनैस्त्रिभिः ॥ ३२ ॥

देयद्रव्यमियत्ता वा दानोत्कर्षे न कारणम् ।
किं त्ववच्छेदराहित्यं धनदाम्बुदयोरिव ॥ ३३ ॥

ददातिराददातिश्च द्वावेतौ परमाद्भुतौ ।
ययोः स्वाम्यं च दास्यं च लीलामात्रविजृम्भितम् ॥

दोषा अपि गुणायन्ते दातारं समुपाश्रिताः ।
कालिमानं किलालम्ब्य कालमेघ इति स्तुतिः ॥ ३५ ॥

किं दातुरखिलैर्दोषैः किं लुब्धस्याखिलैर्गुणैः ।
न लोभादधिको दोषो न दानादधिको गुणः ॥ ३६ ॥

अर्थाः साधारणा एव वियुज्यन्ते स्वभावतः ।
ममतां त्यजतां तेषु महदुत्पद्यते यशः ॥ ३७ ॥

मृतोऽप्यर्थं न मोक्ष्यामि बद्ध्वा नेष्यामि मूर्धनि ।
इति चेत्सुदृढो लोभः पात्रे देयमशङ्कितम् ॥ ३८ ॥

षष्टिर्देशान्तरे लभ्या शतं दत्त्वात्र नैगमे ।
पात्रे त्वेकमिहोत्सृज्य परत्रानन्तमाप्यते ॥ ३९ ॥

को दत्ते क इवादत्ते स्वादृष्टं स्वेन भुज्यते ।
धीभेदमात्रे दातृत्वे क्लिश्यन्ते कृपणाः कियत् ॥ ४० ॥

स्वातन्त्र्यं यदि चोरेषु भोक्तृत्वं यदि बन्धुषु ।
निष्कर्षे तु भ्रमः स्वाम्यं तत्त्यक्त्वा लभ्यतां यशः ॥

न धैर्येण विना लक्ष्मीर्न शौर्येण विना जयः ।
न ज्ञानेन विना मोक्षो न दानेन विना यशः ॥ ४२ ॥

स्वकीयान्भुञ्जते मत्स्याः स्वापत्यानि फणाधराः ।
बलाबलव्यवस्थेयं बलिनस्त्वकुतोभयाः ॥ ४३ ॥

गुरुं हत्वा दिवं याति तृणं छित्त्वा पतत्यधः ।
बलिनां दुर्बलानां च श्रुतयोऽपि द्विधा स्थिताः ॥ ४४ ॥

बलिनो बलिनः स्निह्यन्त्यबलं तु निगृह्णते ।
दावं दीपयते चण्डो दीपं व्याहन्ति मारुतः ॥ ४५ ॥

बाधका अपि लोकानां बलिनो बिभ्यति स्वयम् ।
सर्वं बलवतां पथ्यं भिषग्भिरभिधीयते ॥ ४६ ॥

शुभप्रारब्धलब्धापि लक्ष्मीः शौर्यविवर्जिता ।
शोकेन दह्यमानास्ते षण्डे कुलवधूरिव ॥ ४७ ॥

सर्वत्र लाल्यते शूरो भीरुः सर्वत्र हन्यते ।
पच्यन्ते केवला मेषाः पूज्यन्ते युद्धदुर्मदाः ॥ ४८ ॥

भार्यायाः सुन्दरः स्निग्धो वेश्यायाः सुन्दरो धनी ।
श्रीदेव्याः सुन्दरः शूरो भारत्याः सुन्दरः सुधीः ॥४९॥

न शौर्यं शौर्यमित्येव स्तूयते बुद्धिशालिभिः ।
किं तु नीत्या समाश्लिष्टं वाग्मित्वमिव मेधया ॥ ५० ॥

शौर्येण लोकसेव्यत्वं शौर्येण क्षितिपालता ।
शौर्येण लभ्यः स्वर्गोऽपि शौर्यं कस्य न साधनम् ॥

समरेषु नरेन्द्राणां सवनेषु द्विजन्मनाम् ।
प्रतिकर्मसु नारीणां शौर्यं भवति भूषणम् ॥ ५२ ॥

शौर्ये तुल्ये कथं वृत्तं स्वामी दास इति द्विधा ।
अन्वयव्यतिरेकाभ्यां नीतिरित्यवधार्यताम् ॥ ५३ ॥

न जयाय स्वतः शौर्यं किं तु नित्योपबृंहितम् ।
प्रयुक्तं हि जयत्यस्त्रं प्रयोक्त्रा न स्वतः क्वचित् ॥ ५४ ॥

इदमेव परं शौर्यमुपायैस्त्रिभिरन्वितम् ।
इदमेव परं मौर्ख्यमुपायैस्त्रिभिरुज्झितम् ॥ ५५ ॥

पराक्रमन्ते युद्धेषु सममेवोभये भटाः ।
विजयन्तेऽप्युपायज्ञा विजीयन्ते तदुज्झिताः ॥ ५६ ॥

किं शास्त्रैर्बहुधाभ्यस्तैः किं चातुर्येण किं धिया ।
किं शौर्येणानिवार्येण ललाटे चेन्न लिख्यते ॥ ५७ ॥

घटमानाः कुटुम्बेषु ददतीति विपश्चितः ।
मूढेषु रमते लक्ष्मीरहो दिष्टस्य चेष्टितम् ॥ ५८ ॥

तुल्यं कर्षन्ति पृथिवीं तुल्यं शास्त्राण्यधीयते ।
उन्मज्जन्ति निमज्जन्ति दैवस्यैकस्य चेष्टया ॥ ५९ ॥

लुभ्यन्ति वितरन्तोऽपि कुप्यन्ति सरला अपि ।
मुह्यन्ति मतिमन्तोऽपि भोक्तुर्भाग्यविपर्ययात् ॥ ६० ॥

अधीयते विजानन्ति विरज्यन्ति मुहुर्मुहुः ।
नात्यन्ताय निवर्तन्ते नरा वैषम्यतो विधेः ॥ ६१ ॥

दोहदैरालवालैश्च कियद्वृक्षानुपास्महे ।
ते तु कालं प्रतीक्षन्ते फलपुष्पसमागमे ॥ ६२ ॥

कः प्रसूते पुरोवातं कः प्रेरयति वारिदम् ।
प्राप्ते तु श्रावणे मासि भवत्येकार्णवं जगत् ॥ ६३ ॥

कालः करोति कार्याणि काल एव विहन्ति च ।
करोमीति विहन्मीति मूर्खो मुह्यति केवलम् ॥ ६४ ॥

अपि कालस्य यः कालः सोऽपि कालमपेक्षते ।
कर्तुं जगन्ति हर्तुं वा कालस्तेन जगत्प्रभुः ॥ ६५ ॥

कालः सदागतिरपि स्थायीव परिचेष्टते ।
चण्डमारुतवद्विश्वमधरोत्तरयन्क्षणात् ॥ ६६ ॥

कालश्चालयति प्रायः पण्डितान्पामरानपि ।
तं चेद्विकीर्षसि वशे तितिक्षैव महौषधम् ॥ ६७ ॥

रन्ध्रेषु प्रहरिष्यन्तः कति कामादयोऽरयः ।
क्षणान्नश्यति लोकोऽयं क्षमा चेन्न नियच्छति ॥ ६८ ॥

अपकारपराणामप्युपकुर्वन्ति साधवः ।
छिन्दन्तमपि वृक्षः स्वच्छायया किं न रक्षति ॥ ६९ ॥

स्रवत्येव सदा ज्ञानं स्रवत्येव सदा तपः ।
छिद्रं छिद्रमनुप्राप्य न चेच्छादयति क्षमा ॥ ७० ॥

क्षमां रक्षन्ति ये यत्नात्क्षमां रक्षन्ति ते चिरम् ।
क्षमास्ते निभृता येषु क्षमास्ते सर्वकर्मसु ॥ ७१ ॥

मूर्खाः शमयितुं दुःखं संरभन्ते ततस्ततः ।
क्षमयैव निगृह्णन्ति धीराः संरम्भवर्जिताः ॥ ७२ ॥

आ काल्यादा निशीथाच्च कुक्ष्यर्थं व्याप्रियामहे ।
न च निर्वृणुमो जातु शान्तास्तु सुखमासते ॥ ७३ ॥

नायस्यन्ति शरीराणि न दैन्यमवबुध्यते ।
संभवत्यपि चानन्दः शान्तिमभ्यस्यतां सताम् ॥ ७४ ॥

प्रसीदत्यपरिस्पन्दि पयः कलुषितं यथा ।
तथा शान्तमपि स्वान्तं प्रसीदति शनैः शनैः ॥ ७५ ॥

यत्नेन महता लभ्या दास्या द्वित्राः सुखाय नः ।
शान्तस्य कालादृष्टाद्याः शतं भृत्या अवेतनाः ॥ ७६ ॥

अपि मृद्व्या गिरा लभ्यः सदा जागर्त्यतन्द्रितः ।
नास्ति धर्मसमो भृत्यः किंचिदुक्तस्तु धावति ॥ ७७ ॥

अर्थेनोपार्ज्यते धर्मो धर्मेणार्थ उपार्ज्यते ।
अन्योन्याश्रयणं ह्येतदुभयोत्पत्तिसाधनम् ॥ ७८ ॥

विपणिः पुण्यतीर्थानि विक्रेतारस्त्वकिंचनाः ।
तृणेनाप्यन्ततो धर्मः पर्वसु क्रीयते महान् ॥ ७९ ॥

चुलुकोदकमात्रेण धान्यमुष्टिव्ययेन च ।
मरुभूमिषु दुर्भिक्षे धर्मसस्यं महाफलम् ॥ ८० ॥

धर्मो नर्मसखः कामे गुरुस्तत्त्वोपदेशने ।
भटः संगररङ्गेषु सचिवोऽर्थसमार्जने ॥ ८१ ॥

भुवि वृक्षा दिवि च्छाया भुवि कूपो जलं दिवि ।
भुवि यद्दृह्यते विप्रैर्दिवि तद्दीयते सुरैः ॥ ८२ ॥

कदलीकंदवद्धर्मो न रोहति बहिर्गतः ।
छादितस्तु फलं चारु सूते पनसमूलवत् ॥ ८३ ॥

दुःखेनोपार्ज्यते धर्मः सुखेन तु विनश्यति ।
कृच्छ्रलब्धममुं त्रातुं नेच्छन्ति मुनयः सुखम् ॥ ८४ ॥

संपाद्यतां वा यत्नेन यद्वा विक्रीयतामयम् ।
सर्वदा भुज्यतां वान्यैर्धर्मो भवति नान्यथा ॥ ८५ ॥

अर्थवन्तः प्रशस्यन्ते निन्द्यन्ते तद्विनाकृताः ।
आगमेष्वपि चेदेवमद्भुतं किं शरीरिषु ॥ ८६ ॥

अर्थोऽप्यर्थेन चेत्साध्यः का वार्ता धर्मकामयोः ।
अर्थः सर्वजगन्मूलमनर्थोऽर्थविपर्ययः ॥ ८७ ॥

कर्म ज्ञानं च मोक्षाय कर्मण्यर्थोऽधिकारिता ।
अतोऽर्थेनैव कैवल्यं न कैवल्येन लभ्यते ॥ ८८ ॥

कथमर्थं निषेधन्तु श्रुतयः स्मृतयोऽपि वा ।
यासामेकं पदमपि न चलत्यर्थतो विना ॥ ८९ ॥

लक्ष्मीश इति गोविन्दो मेरुधन्वेति शंकरः ।
हिरण्यगर्भ इत्येव ब्रह्मापि बहुमन्यते ॥ ९० ॥

ऊर्ध्वं गच्छन्ति यं त्यक्त्वा यं गृहीत्वा पतन्त्यधः ।
तस्य गौरवमर्थस्य तावतैवानुमीयताम् ॥ ९१ ॥

गृहिणा यदि लभ्येत गृहिणी हृदयंगमा ।
संसार इति को भारस्तं सारमनुपश्यतः ॥ ९२ ॥

आहृत्य चिनुमः स्वर्गमपवर्गमपि क्रमात् ।
अनुकूले हि दांपत्ये प्रतिकूले न किंचन ॥ ९३ ॥

गृहिणीवृत्तदोषेण गौतमोऽत्यन्ततापितः ।
आतस्थे दुःखविध्वंसं कैवल्यं परमं मुनिः ॥ ९४ ॥

अपि यत्परमं तत्त्वमर्धेन्दुकृतशेखरम् ।
तस्यापि तावानानन्दः किमस्मज्जननीं विना ॥ ९५ ॥

निन्दन्ति च प्रशंसन्ति निगमा यद्गृहाश्रमम् ।
दांपत्यसाम्यवैषम्यभेदादेतद्व्यवस्थितिः ॥ ९६ ॥

इन्द्रियाण्यनुपक्लेश्य लभ्यं श्रेयो गृहाश्रमे ।
अतस्तुर्याश्रमं प्राहुरबाधन्यायबाधितम् ॥ ९७ ॥

भुज्यते यत्सुखं धीरैरप्रमत्तैर्गृहाश्रमे ।
स्वर्गस्तस्याङ्गसंपूर्तिरपवर्गोऽस्य नित्यता ॥ ९८ ॥

दृष्टदोषेऽपि गार्हस्थ्ये दूरदर्शितया स्वयम् ।
गार्हस्थ्यमेव परमं मेने नैयायिको मुनिः ॥ ९९ ॥

उच्चावचं जगद्दौःस्थ्यमेकदैव निषेधति ।
प्रविष्टमात्रो नृपतिः प्रपञ्चमिव न श्रुतिः ॥ १०० ॥

न राजानं विना राज्यं बलवत्स्वपि मन्त्रिषु ।
प्राणेष्वसत्सु किं देहश्चण्डवातेन धार्यते ॥ १०१ ॥

मातुः किंचित्पितुः किंचिदाचार्यात्किंचिदाप्यते ।
सम्यग्विनीताच्छास्त्रेषु सर्वं राज्ञस्तु लभ्यते ॥ १०२ ॥

चलन्ति सर्वमर्यादाश्चलिते सति पार्थिवे ।
पर्वता अपि कम्पन्ते प्रसक्ते कम्पने भुवः ॥ १०३ ॥

पत्न्या माङ्गल्ययोगेन पत्युरायुः प्रवर्धते ।
प्रकृतीनां तु भाग्येन पार्थिवः सुखमेधते ॥ १०४ ॥

निर्मितं शतकं साग्रं नीलकण्ठेन यज्वना ।
सभारञ्जनमेतेन साधयन्तु मनीषिणः ॥ १०५ ॥

इति श्रीनीलकण्ठदीक्षितविरचितं
सभारञ्जनशतकं संपूर्णम् ॥

# ॥ शान्तिविलासः ॥

*N. 3

॥ श्रीः ॥

# ॥ शान्तिविलासः ॥

वंशे कस्मिन्नजनिषि कयोः पुत्रतामग्रहीषं

कत्यश्रौषं तदपि कतिधा तच्च सद्भ्यः कतिभ्यः ।

किं नाद्राक्षं व्यसनमपि वा किं सुखं नान्वभूवं

नोपारंसीत्तदपि हृदयं कीदृशो मे विपाकः ॥ १ ॥

पादौ मे स्तः परमचतुरौ कीकटानेव गन्तुं

वागप्यास्ते निभृतमनृतान्येव वक्तुं वचांसि ।

मीमांसन्ते मम च मतयो दोषदृष्टौ परेषां

पङ्गुर्मूकः पशुरपि भवाम्यात्मनीने तु कृत्ये ॥ २ ॥

यामाराद्धुं न गणितमिदं जीवितं वा धनं वा
 यस्याः प्रीतिर्मनसि कलिता ज्यायसी मोक्षतोऽपि ।
सैवेदानीं वयसि चलिते संप्रहीणे च वित्ते
 तूलायापि त्रिपुरहर मां मन्यते नैव भार्या ॥ ३ ॥

कृत्वा पापान्यपि खलु मया पोषिताः शैशवे ये
 निद्राहारावपि विजहता शिक्षिता ये कलासु ।
प्रादुर्भूताः स्वयमिव हि ते प्राक्तनादृष्टलब्ध-
 प्रज्ञोन्मेषा इव च तनया न स्मरन्त्यात्मनोऽपि ॥ ४ ॥

दाराः पुत्राः परमसुहृदो बान्धवाः किंकरा वा
 स्वप्नावस्थास्वपि च विरहं ये मया न क्षमन्ते ।
अत्यासन्ने तपनतनयस्याज्ञया दूतवर्गे
 तेष्वेकोऽपि स्मरहर न मे गन्तुमन्वस्ति जन्तुः ॥ ५ ॥

राज्ञो भृत्या यदि परिचिता दैशिकस्यैष लाभो
 राजद्वारे यदि खलु गतं नैमिशे तत्प्रविष्टम् ।
राजा दृष्टोऽथ च यदि परं ब्रह्म साक्षात्कृतं त-
 त्त्यक्तो देहो यदि नृपकुले मादृशां सोऽपवर्गः ॥ ६ ॥

यत्तीर्थानामटनमथ यत्पूजनं देवताना-
मिष्टापूर्तव्यसनमपि यद्यच्च दाक्ष्यं कलासु ।
अर्थप्राप्त्यौपयिकमखिलं जायते मादृशां त-
त्ते चाप्यर्था धरणिशरणा भूमिभृत्सात्कृता वा ॥ ७ ॥

आ कौमाराद्गुरुचरणशुश्रूषया ब्रह्मविद्या-
स्वास्थायास्थामहह महतीमर्जितं कौशलं यत् ।
निद्राहेतोर्निशि निशि कथाः शृण्वतां पार्थिवानां
कालक्षेपौपयिकमिदमप्याः कथं पर्यणंसीत् ॥ ८ ॥

छाया तोयं वसनमशनं वाहनं दीपिका वा
क्रेतुं यस्मिन्किल न सुलभं किंचिदप्येषु मर्त्यैः ।
तस्मिन्दूरे पथि तनुभृतां सर्वथैवाभिगम्ये
प्रस्थानार्हं कमपि तु विधिं घस्मरा न स्मरामः ॥ ९ ॥

आकर्ण्यन्ते तपनतनयग्रामसंलापघोषा
मन्दं मन्दं ह्रसति निहितः कालपाशोऽपि कण्ठे ।
आपृच्छ्यन्ते कृतजिगमिषासंभ्रमाः प्राणवाता
नैवेदानीमपि विषयवैमुख्यमभ्येति चेतः ॥ १० ॥

चक्षुष्यन्धे चलति दशने श्मश्रुणि श्वेतमाने
सीदत्यङ्गे मनसि कलुषे कम्पमाने कराग्रे ।
दूतैरेतैर्दिनकरभुवः शश्वदुद्बोध्यमाना-
स्त्रातुं देहं तदपि भिषजामेव सान्त्वं वदामः ॥ ११ ॥

शान्तो वह्निर्जठरपिठरे संस्थिता कामवार्ता
धावं धावं दिशि दिशि शनैरिन्द्रियाश्वा निपेतुः ।
एवं दैवादुपरममगादेष मे वैरिवर्ग-
श्चेतस्त्वेकं न वशमयते किं करोमि क्व यामि ॥ १२ ॥

नानोपायैर्दिशि दिशि धनान्यर्जयित्वा व्ययित्वा
सम्यक्संपादितमिदमहो स्थौल्यमेकं शरीरे ।
श्रुत्वा श्रुत्वा बहुजनमुखादायुषैतावतापि
प्राप्तं दर्शावधितिमिरवद्गाढमज्ञानमेकम् ॥ १३ ॥

क्वेक्षन्ते मां क्वचन शयितं किंकरा दण्डपाणे-
रीक्षन्तां वा तदपि मयि किं कुर्युरुद्दामवृत्ते ।
कुर्युः किंचित्प्रसभमपि वा घातयिष्यामि राज्ञे-
त्यन्तर्धैर्यं परमिह वहन्नन्तकं न स्मरामि ॥ १४ ॥

वेदा वा स्युर्वितथवचना विस्मरेदीश्वरो वा
धर्माधर्मस्थितिविरचनामन्तको वा मृषा स्यात् ।
नित्यो वा स्यामहमिति बहूनुल्लिखन्तः समाधी-
न्मेदोवृद्ध्या मुदितमनसः सर्वतो निर्वृताः स्मः ॥ १५ ॥

यामे यामे गलति वपुषः स्रंसते संधिबन्धः
श्वासे श्वासेऽपि च विचलति क्षीयते दीर्घमायुः ।
भुक्ते भुक्तेऽपि च सुखलवे लुप्यते पुण्यराशिः
कृत्ये कृत्ये निरवधि पुनर्वर्धते पातकं नः ॥ १६ ॥

गन्तव्योऽध्वा सकलदुरवस्थानसंपातभूमि-
र्गत्वा द्रश्यस्त्रिभुवनजनायुष्कलान्तः कृतान्तः ।
दृष्ट्वा लभ्या निरयजनिता यातना नैकभेदा
विस्मृत्येदं निखिलमपि तु व्यर्थमायुर्नयामः ॥ १७ ॥

काले काले न किमुपनतं भुञ्जते भोज्यजातं
गृह्णन्त्यम्भो न किमथ न किं संविशन्ति क्षपासु ।
पुष्णन्ति स्वान्न किमु पृथुकान्स्त्रीषु किं नो रमन्ते
कृत्याकृत्यव्यपगतधियां कस्तिरश्चां च भेदः ॥ १८ ॥

कृच्छ्राल्लब्धं धनमपि शतांशाधिकप्राप्तिलोभा-
त्पत्रे किंचिल्लिखितमुपलभ्यैव सर्वं त्यजामः ।
शास्त्रैः सिद्धे बहुशतगुणाधिक्यलाभे परत्र
व्यर्थाशङ्काकलुषमनसो नोत्सृजामोऽर्थलेशम् ॥ १९ ॥

जीर्णे रुग्णे विकलकरणे शत्रुभिर्वा गृहीते
स्वस्मिन्कोऽर्थो भवति सुखदः कश्च कामप्रसङ्गः ।
मा भूदेतत्सकलमथवा स्वायुषः किं प्रमाणं
निश्चित्यैवं दुरितनिचयश्चीयते निर्विशङ्कैः ॥ २० ॥

आयान्त्यग्रे ननु तनुभवा उत्तमर्णा इवेमे
शय्यालग्नाः फणभृत इवाभान्ति दारा इदानीम् ।
कारागेहप्रतिममधुना मन्दिरं दृश्यते मे
तत्र स्थातुं प्रसजति मनो न क्षणं न क्षणार्धम् ॥

जातं जातं गतमपि गतं बाल्यतो लौल्यतो वा
नेतःस्थेयं क्षणमपि गृहे मुञ्चतः को मुहूर्तः ।
इत्यत्यन्तव्यवसितधियो निःसरन्तोऽपि गेहा-
दावर्तन्ते झटिति रुदतां सान्त्वहेतोः शिशूनाम् ॥ २२ ॥

नैव ब्रूमो वयमतिथयोऽभ्यागता बन्धुवर्गा
दीनानाथाः सुहृद इति ये तेषु कार्या दयेति ।
यं त्वं पोष्यं मनसि कुरुषे नित्यमात्मानमेकं
जन्मन्यस्मिन्निव बिभृहि तं सर्वदेत्युल्लपामः ॥ २३ ॥

को नु व्यासः क इव स मनुः को न्वसौ याज्ञवल्क्यो
यैरुद्धुष्टं हितमसकृदस्मासु पित्रेव पुत्रे ।
पश्यामस्तान्निरुपधिकृपासागराँल्लोकबन्धू-
न्पश्यामोऽस्मान्निरवधितमःक्ष्माधरान्ब्रह्मबन्धून् ॥ २४ ॥

यत्तामिस्रे नरककुहरे यद्गुहिश्वक्रवाला-
द्यत्पाताले यदपि धरणौ वार्षिकीषु क्षपासु ।
रूढं गाढं तम इति समस्तं च तच्चिन्त्यमानं
नास्माकान्तःकरणतमसो दासभावेऽपि योग्यम् ॥ २५॥

सर्वानर्थप्रथमकरणे सर्वभावैर्जिहास्ये
देहे मोहो यदि परिणतः पोषणीयो मयेति ।
आस्तामेवं वपुरिदमिवागामि चास्माकमेवे-
त्येषाप्यास्तां मतिरिति परं धर्मशास्त्रेषु घोषः ॥ २६ ॥

कामी कामव्रणपरिगतः कामिनीरेव हित्वा
भुङ्क्ते पश्चादपगतभयं कामिनीनां सहस्रम् ।
इत्थंकारं विषयसुखभोगैकतानैर्नरैर-
प्यस्मिन्देहे कतिपयदिनान्येष भोगो विवर्ज्यः ॥ २७ ॥

न्याय्यादर्थादपि किमधिकं लभ्यमुन्मार्गवृत्त्या
वैधादन्नादपि किमधिकं पर्युदस्तेषु भोज्यम् ।
भार्याभोगादपि भवति कः पण्यकान्तासु भोगः
प्रायो नेति श्रुतिविषयता विश्वमाधुर्यहेतुः ॥ २८ ॥

आस्तिक्यं चेद्धनमखिलमप्यर्थिसात्कर्तुमर्हं
नास्तिक्यं चेत्तदपि सुतरां भोगहेतोरपास्यम् ।
अस्पृष्ट्वापि स्वयमतिरहः स्थाप्यते यत्तदन्त-
स्तस्मिन्हेतुः क इति निभृतं तर्कयामो न विद्मः ॥

श्वानः पुच्छाञ्चलकुटिलतां सूकराः कुक्षिपोषं
कीशा दन्तप्रकटनविधिं गर्दभा रूक्षघोषम् ।
मर्त्या वक्षःश्वयथुमपि च स्त्रीषु दृष्ट्वा रमन्ते
तत्सौन्दर्यं किमिति फलितं तत्तदज्ञानतोऽन्यत् ॥ ३० ॥

रन्तुं प्राप्तो दशति दशनैराननं चेत्प्रियाया
भोक्तुं प्राप्तः किमिति न दशेदग्रहस्तं प्रदातुः ।
इत्थं व्यक्ते हृदयजनुषः पामरोन्मादकत्वे
हातुं सद्यः प्रभवति न कोऽप्यन्ततो लज्जितुं वा ॥३१॥

दाराः पुत्राः शयनमशनं भूषणाच्छादने वा
यच्चेदक्षं पुमभिलषितं तेषु माशब्दिकः कः ।
किं त्वेतेषां भवति नियमः सेवने कोऽपि कोऽपि
द्वेषस्तस्मिन्नपि यदि भवेत्तत्र वक्ता कृतान्तः ॥ ३२ ॥

वेदाभ्यासव्यसनरसिकैः स्थीयते तावता किं
सूक्ष्मा बुद्धिः श्रुतमिव विशत्यश्रुतं तावता किम् ।
जल्पारम्भे जयति नियतं वादिनस्तावता किं
निर्वेदार्तं न यदि हृदयं शान्तिमभ्येति पुंसः ॥ ३३ ॥

यस्त्वत्यन्तव्यवसितमतिः संजिघृक्षेत धर्मं
खट्वाङ्गादेरिव न किमलं तस्य यामार्धमायुः ।
दुष्पाण्डित्यादपहृतमतिर्यः पुनः संशयात्मा
कस्मै तस्य प्रभवतु वृथा काकवद्दीर्घमायुः ॥ ३४ ॥

अर्था न स्युर्यदि विजहिमो धर्ममर्थैकसाध्यं
कायक्लेशैः कतिकतिविधः साधनीयो न धर्मः ।
कायः श्रान्तो यदि भवति कस्तावता धर्मलोप-
श्चित्तं दत्त्वा सकृदपि शिवे चिन्तितं साधयामः ॥३५॥

स्वेनैवोक्तं निगमवचसा बोधनीयास्तु जीवा
जीवैरेवेत्यपि च मुनिभिः कारितं धर्मशास्त्रम् ।
उत्पश्यन्तु स्वयमिति भवो दारुणश्चाल्यतेऽसा-
वद्यापि स्मो यदि खलु जडाः किं विधत्तां शिवोऽपि ॥

येनाचान्ताः सलिलनिधयो येन सृष्टा प्रतिद्यौः
शस्त्राण्यस्त्राण्यपि कबलितान्येकया यस्य यष्ट्या ।
कस्तादृक्षः प्रभवतु जनो देवभूदेववर्गे
कालः कीटानिव कवलयामास तानप्ययत्नम् ॥ ३७ ॥

कायस्थैर्यं करणपटुतां बन्धुसंपत्तिमर्थं
चातुर्यं वा किमिव हि बलं बिभ्रतो निर्भराः स्मः ।
अन्त्यः श्वासः किमयमथवोपान्त्य इत्यामृशन्तो
विस्मृत्येशं निमिषमपि किं वर्तितुं पारयामः ॥ ३८ ॥

अभ्यस्यादौ श्रुतिमथ गृहं प्राप्य लब्ध्वा महार्था-
निष्ट्वा यज्ञैर्जनिततनयः प्रव्रजेदायुषोऽन्ते ।
इत्याचष्टे य इह स मनुर्याज्ञवल्क्योऽपि वा मे
तावत्कालं प्रतिभवति चेदायुषस्तत्प्रमाणम् ॥ ३९ ॥

अन्नं धान्यं वसु वसुमतीत्युत्तरेणोत्तरेण
व्याकृष्यन्ते परमकृपणाः पामरा यद्वदित्थम् ।
भूमिः खं द्यौर्द्रुहिणगृहमित्युत्तरेणोत्तरेण
व्यामुह्यन्ते विमलमतयोऽप्यस्थिरेणैव धाम्ना ॥ ४० ॥

प्रायश्चित्तं सकृदुपनते वा प्रमादात्कृते वा
भूयो भूयोऽप्यवहिततरैः साधिते कः समाधिः ।
कारुण्याब्धिर्यदि पुरहरः सत्सु कामं दयेत
भ्रष्टे मादृश्यपि स दयते चेत्क्षतो धर्मसेतुः ॥ ४१ ॥

साध्या शंभोः कथमपि दयेत्यप्यसाध्योपदेशः
कोपं तस्य प्रथममपनुद्यैव साध्यः प्रसादः ।
कोपो वर्णाश्रमनियमिताचारनिर्लङ्घनोत्थः
शान्तिं नेयः स कथमधुनाप्यव्यवस्थाप्रवृत्तेः ॥ ४२ ॥

इष्टापूर्तैर्निगमपठनैः कृच्छ्रचान्द्रायणाद्यैः
स्वामिन्नन्यैरपि तव मनः काममावर्जयेम ।
मध्ये मध्ये यदि न निपतेत्कर्मणा चोदितानां
ज्ञानं श्रद्धेत्युभयमपि नो जातिवैर्यैर्गलेव ॥ ४३ ॥

निर्मर्यादः परमचपलो निःसमाज्ञानराशि-
र्मादृक्षोऽन्यः क इति भुवने मार्गणीयं त्वयैव ।
ईदृक्षेऽपि क्वचिदिह दयेयेति कौतूहलं चे-
त्स्वामिन्विश्वेश्वर तव भवं निस्तरेयं तदाहम् ॥ ४४ ॥

पश्चात्तप्ताः कथमपि विधेः किंकरीभूय कुर्मः
सेवां शंभोरिति च नियमं वापि संकल्पयामः ।
आयुः किं मे किमिव करणं दुस्तरे संकटेऽस्मि-
न्स्वामिन्गौरीरमण शरणं नस्त्वमेव त्वमेव ॥ ४५ ॥

सम्यग्युक्तास्त्रिभिरपि मलैश्चिद्विकासैकरूपा-
स्त्वन्निध्यानप्रवणमनसः सूरयस्त्वत्पुरे ये ।
तेषां संदर्शयितुमपरिज्ञातपूर्वं कदाचि-
ज्जन्तुं मुग्धं शिव नयसि किं विश्वपारं पुरं माम् ॥

दिष्ट्या लब्धं द्विजवरकुले जन्म तत्रापि दिष्ट्या
धर्माधर्मस्थितिरवगतैव प्रसादाद्गुरूणाम् ।
जन्मन्यस्मिन्नपि यदि न मे संभवेदास्तिकत्वं
निस्तारः किं निरयभवनात्सर्वमोक्षेऽपि लभ्यः ॥ ४७ ॥

भव्ये देहे पटुषु करणेष्वालये श्रीसमृद्धे
कौमारान्ते वयसि कथमप्यप्रवृत्ते च दुःखे ।
प्रत्यक्पुष्पीप्रसवविधया यस्य पुंसो निसर्गा-
त्प्रत्यग्वक्त्रं भवति हृदयं कस्ततोऽप्यस्ति धन्यः ॥४८॥

नाहं याचे पदमुडुपतेर्नाधिकारं मघोनो
नापि ब्राह्मीं भुवनगुरुतां का कथान्यप्रपञ्चे ।
अन्यस्यान्यः श्रियमभिलषन्नस्तु कस्तस्य लोको
मह्यं शंभो दिश मसृणितं मामकानन्दमेव ॥ ४९ ॥

आ गर्भादा कुलपरिवृढादा चतुर्वक्त्रतोऽपि
त्वत्पादाब्जप्रपदनपरान्वेत्सि नश्चन्द्रमौले ।
मायायाश्च प्रपदनपरेष्वप्रवृत्तिं त्वमात्थ
स्वामिन्नेवं सति यदुचितं तत्र देवः प्रमाणम् ॥ ५० ॥

दण्डं धत्ते सकलजगतां दक्षिणो यः कृतान्तो
नामाप्यस्य प्रतिभयतनोर्नोपगृह्णीमहीति ।
प्राप्ताः स्मस्तं निगमवचसामुत्तरो यः कृतान्तो
यद्वा तद्वा भवतु न पुनस्तस्य पश्येम वक्त्रम् ॥ ५१ ॥

इति श्रीनीलकण्ठदीक्षितविरचितं
शान्तिविलासः संपूर्णः ॥

# ॥ वैराग्यशतकम् ॥

*N. 4

வாக்கியபாராயணம்

ஞானவைராக்கியதெரிசனம்

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

॥ श्रीः ॥

# वैराग्यशतकम् ॥

आस्ते कश्चन भिक्षुः संगृह्णन्नव्ययानि दश ।
न ममेत्यव्यययुगलं याचामस्तं किमस्त्यन्यत् ॥ १ ॥

धीसचिवं धैर्यबलं संकल्पविरोधि शान्तिधनम् ।
विश्वत्रयविषयमिदं वैराग्यं नाम साम्राज्यम् ॥ २ ॥

राज्ञो बिभ्यति लोका राजानः पुनरितोऽपि वैरिभ्यः ।
आ ब्रह्मणः कृतान्तादकुतोभयमस्पृहाराज्यम् ॥ ३ ॥

भिक्षाप्रदा जनन्यः पितरो गुरवः कुमारकाः शिष्याः ।
एकान्तरमणहेतुः शान्तिर्दयिता विरक्तस्य ॥ ४ ॥

किमपि न ये चेष्टन्ते कार्यप्रतिकार्ययोर्विरहात् ।
सन्तस्त एव मुक्ताः संदेहे गौतमः साक्षी ॥ ५ ॥

पततु नभः स्फुटतु मही चलन्तु गिरयो मिलन्तु वारिधयः ।
अधरोत्तरमस्तु जगत्का हानिर्वीतरागस्य ॥ ६ ॥

के चोराः के पिशुनाः के रिपवः के च दायादाः ।
जगदखिलं तस्य वशे यस्य वशे हतमिदं चेतः ॥ ७ ॥

विषया उपतिष्ठन्तां विषयैर्वा समवयन्तु करणानि ।
आन्तरमेकं करणं शान्तं यदि का ततश्चिन्ता ॥ ८ ॥

किं विषयान्परिहर्तुं वस्तव्यं मेरुकंदरेष्वबुधैः ।
न ह्यद्भिरनासक्तुं पांसुषु रोहन्ति पद्मानि ॥ ९ ॥

अज्ञानमिह निदानं प्राग्रूपं जननमेव भवरोगे ।
परिपाकः संसरणं भैषज्यं नैष्ठिकी शान्तिः ॥ १० ॥

स्वेनैव भुक्तमर्थं सूकरजातिस्मरो मनुष्य इव ।
दूरे जुगुप्समानो धीरो वैराग्यमाद्रियते ॥ ११ ॥

शैशवमिव कौमारे तत्तरुणिम्नीव स इव वृद्धत्वे ।
न स्वदते धीराणां कामस्य विचेष्टितं शान्तौ ॥ १२ ॥

शतशः परीक्ष्य विषयान्सद्यो जहति कचित्कचिद्धन्याः ।
काका इव वान्ताशनमन्ये तानेव सेवन्ते ॥ १३ ॥

चरमौ मातापितरौ चरमा गृहिणी सुताश्चरमाः ।
कर्तव्येऽतिप्रेमणि कथमिह धीरा विरज्यन्ते ॥ १४ ॥

तृणवद्भ्रमन्ति चपलाः स्त्रीनामनि चण्डमारुते चलिते ।
धरणिधरा इव सन्तस्तत्र न किंचित्प्रकम्पन्ते ॥ १५ ॥

कामिजनपरमभोग्ये कामसुखे धारयन्ति बीभत्सम् ।
सन्तः शमसुखरसिकाः सुधाशनाः सूकरान्न इव ॥ १६ ॥

विक्षेपमात्रभाजो विकासकाष्ठागतज्ञानाः ।
स्वस्यापि चेष्टितानि स्वयमीक्षन्ते परस्येव ॥ १७ ॥

अस्थानेऽभिनिविष्टान्मूर्खानस्थान एव संतुष्टान् ।
अनुवर्तन्ते धीराः पितर इव क्रीडतो बालान् ॥ १८ ॥

पुष्णाति पुरुषे सलिलैर्मुष्णाति पुष्पं फलं च तरव इव ।
वर्तन्ते सन्तः सममुपकर्तरि चापकर्तरि च ॥ १९ ॥

नित्यानित्यविवेकः सर्वेषां घटघटत्वयोरास्ते ।
स विवेको यः शान्तिकृदविवेकोऽन्यः समस्तोऽपि ॥

अनधिगते कामसुखे कालेन यथा प्रवर्तते तरुणः ।
एवं ब्रह्मसुखेऽपि प्रवर्तते कोऽपि भाग्यवशात् ॥ २१ ॥

पुत्रगुणाः स्वातन्त्र्ये दारगुणाश्चाधिवेदनावसरे ।
भ्रातृगुणा दायविधौ द्रष्टव्या मोक्ष्यमाणेन ॥ २२ ॥

का मे गतिरिति पृच्छति चरमश्वासेऽपि यः स्वार्थम् ।
तस्य जनस्यापि कृते पापाः पापानि कुर्वन्ति ॥ २३ ॥

पितृभिः कलहायन्ते पुत्रानध्यापयन्ति पितृभक्तिम् ।
परदारानुपयन्तः पठन्ति शास्त्राणि दारेषु ॥ २४ ॥

शान्तिरलभ्यादुपरतिरपात्रभावः प्रतिग्रहनिवृत्तिः ।
क्षान्तिर्दुर्बलतेति च निवृत्तिधर्माः कलावेते ॥ २५ ॥

नीतिज्ञा नियतिज्ञा वेदज्ञा अपि भवन्ति शास्त्रज्ञाः ।
ब्रह्मज्ञा अपि लभ्याः स्वाज्ञानज्ञानिनो विरलाः ॥२६॥

कलिकलुषे मनसि स्वे कथमिव जगदार्जवं लभताम् ।
चक्षुर्दोषे जाग्रति चान्द्रं द्वित्वं कुतो यातु ॥ २७ ॥

विषयाननुकूलयितुं विषयिणि हृदये विधीयतां यत्नः ।
दृशि देयमौषधं को दृश्ये दत्त्वा कृती भवति ॥ २८ ॥

दाराः पुत्रेषु रताः पुत्राः पितृधनपरिग्रहव्यग्राः ।
रोदनशरणा जननी परलोकगतस्य को बन्धुः ॥ २९ ॥

पश्यन्ति म्रियमाणान्मरिष्यतोऽनुमिमते स्मरन्ति मृतान् ।
कथयन्ति चैवमसकृच्चेष्टन्ते नित्यवत्तु परम् ॥ ३० ॥

कलहायन्ते मूढाः कः प्रतिभूः श्वः प्रभात इति ।
तस्यामेव रजन्यां कः प्रतिभूः स्वस्य सत्तायाम् ॥ ३१ ॥

आप्रपदमाशिरस्पदमन्तः कलिमलमलीमसे वपुषि ।
विफलं गङ्गाजलमपि मद्यघटे दर्भमुष्टिरिव ॥ ३२ ॥

दण्ड्यं यत्सुखहेतोः पुष्णान्ति जनाः कथं तदेव वपुः ।
न हि शर्कराभिलाषिभिरिक्षोः काण्डानि पूज्यन्ते ॥

कुल्याः कृता विशालाः कुड्यान्युपलैर्निबद्धानि ।
क्रीता बलिनो महिषाः कृतकृत्याः स्म इति मन्यन्ते ॥

प्रायो मुह्यति चेतः प्राणभृतः प्राणनिर्गमावसरे ।
पुण्येन यदि न मुह्यति पुत्रानेव स्मरन्म्रियते ॥ ३५ ॥

शमयितुमौदरमग्निं संसारे सागरे निमज्जन्ति ।
तुहिनव्यथानिवृत्त्यै न हि वेश्मनि पावको देयः ॥ ३६ ॥

अर्थानामधिकानां राज्ञा चोरेण वा ध्रुवो नाशः ।
अन्ने खल्वतिभुक्ते वमनं वा स्याद्विरेको वा ॥ ३७ ॥

आहृत्य परित्यक्ता जनयन्त्यर्थाः सुखाभासम् ।
अत्यन्तपरित्यक्ताः परमानन्दाय कल्पन्ते ॥ ३८ ॥

प्रणमति परिसान्त्वयति प्रलपति याचति परिभ्रमति ।
आविष्ट इव पिशाच्या पुरुषस्तृष्णावशं यातः ॥ ३९ ॥

जननाद्दृष्टात्पितरौ पुत्रा जामातरो व्ययाद्दृष्टात् ।
कलहाद्दृष्टाज्ज्ञातय इति निर्णीते किमेष्टव्यम् ॥ ४० ॥

स्वपितुः परलोकाय स्वयमनुदिवसं यदाचरति ।
क्रियतामिदमुपमानं किं नालं पुत्रवैराग्ये ॥ ४१ ॥

अननुगते दारिद्र्ये किमनुगतं लक्षणं दृष्टम् ।
कामस्यापरिपूर्तौ कृपणं जगदा चतुर्वदनात् ॥ ४२ ॥

न खलु धनत्वं जातिर्यस्य यदिष्टं तदेव तस्य धनम् ।
तत्तदिव पामराणामाकिंचन्यं धनं विदुषाम् ॥ ४३ ॥

स्वीक्रियते यदि तृष्णा स्वीकर्तव्यं जगत्समस्तमपि ।
स्वीक्रियते यदि शान्तिः स्वात्मापि स्वस्य भवति न वा ॥

यद्दातारं वशयति यत्परिजनमस्य सान्त्वयति ।
यदपत्रपते नान्तर्भावी लाभः स कस्य समः ॥ ४५ ॥

प्रादेशमात्रमुदरं परिपूरयितुं कियानयं यत्नः ।
चुलकेनाम्भः पातुं खनितव्यः किं तडागोऽपि ॥ ४६ ॥

यामार्धमसंस्काराद्यामद्वयमनशनाच्च सुव्यक्ते ।
शरीरे सौन्दर्येऽभिनिविशन्ते कियन्मूढाः ॥ ४७ ॥

वन्ध्येत्याहुस्तरुणीं जरतीति परित्यजन्ति बहुपुत्राम् ।
अपि निन्दन्त्यल्पसुतां का गृहिणी कामिनां हृद्या ॥ ४८ ॥

यान्ति शुचमकृतदारा द्वे भार्ये नेति कृतदाराः ।
ते परदारा नेति स्त्रीभिस्तृप्तान्न पश्यामः ॥ ४९ ॥

मदनस्याज्ञाकरणे मन्ये जगदखिलमेकरूपमिदम् ।
तिर्यञ्च इति नरा इति देवा इत्यन्यतो भेदः ॥ ५० ॥

शुक्लविमोकस्थानं मलमूत्रत्यागदेशवत्किमपि ।
स्त्रिय इति विधिना विहितं कियदत्र जना निमज्जन्ति ॥

वेदानधीत्य विधिवन्मीमांसित्वा तदर्थं च ।
दाराः कर्तव्या इति केनेदं प्रहसनं कथितम् ॥ ५२ ॥

दुःखेनोपार्ज्यन्ते पाल्यन्ते प्रत्यहं च लाल्यन्ते ।
वामाः स्त्रियो विमूढैरुपभुञ्जानाः सुखं द्विगुणम् ॥ ५३ ॥

अश्नीत पिबत खादत जागृत संविशत चलत तिष्ठत वा ।
सकृदपि चिन्तयतान्तः सावधिको देहबन्ध इति ॥ ५४ ॥

किं विजितया पृथिव्या किं काञ्चनभूभृता करस्थेन ।
किं दिव्याभिः स्त्रीभिर्मर्तव्ये ब्रह्मणा लिखिते ॥ ५५ ॥

जीवति कतिचिन्निमिषान्कतिचित्तेषु श्रुतीरधीत इव ।
तावत्येवाकुलयति तन्त्राणि नवानि चातनुते ॥ ५६ ॥

स्वल्पो जीवनकालः स्वल्पा धीः परिचयः स्वल्पः ।
तदपि तरेम कथंचिच्छ्रुतयो यदि नोपजायन्ते ॥ ५७ ॥

कुत आगतं न जाने क्व नु वा गन्तव्यमिदमपि न जाने ।
संचरासि केदानीं संसारपथे महातमसि ॥ ५८ ॥

तमसावृताश्चरन्तः सविधे दूरे च नावयन्त्यर्थान् ।
अवयन्ति तु विस्पष्टं तदिति शिरस्यभिहते मूढाः ॥ ५९ ॥

निमिषन्त्यत्र तरुण्यस्तत्र तरुण्यो न निमिषन्ति ।
ईदृक्षो हि विशेषः स्वर्गः स्वर्ग इति किं तत्र ॥ ६० ॥

कोपो मैत्रावरुणेः शापो वा तार्किकस्य मुनेः ।
संस्मर्यते यदि सकृच्छक्तोरपि मास्तु शक्रपदम् ॥ ६१ ॥

गच्छत्वमरावत्यां गच्छतु चतुराननस्य वा नगरे ।
पुनरागन्तव्यं यदि पुंसा किं साधितं भवति ॥ ६२ ॥

भुक्ता बहवो दारा लब्धाः पुत्राश्च पौत्राश्च ।
नीतं शतमप्यायुः सत्यं वद मर्तुमस्ति मनः ॥ ६३ ॥

विश्लेषणस्वभावान्विषयान्पश्यन्करोति को ममताम् ।
नश्यदवस्थापन्नं कः क्रीणीते धनैरश्वम् ॥ ६४ ॥

अन्नाभावे मृत्युः शालिभिरन्नानि शालयो वृष्ट्या ।
वृष्टिस्तपसेति वदन्नमृत्यवे तत्तपश्चरतु ॥ ६५ ॥

किं न निगृह्णन्ति मनः किं न भजन्ते जनाः शिवं शरणम् ।
अभिसंधिभेदमात्रान्मोक्षोपायेन बध्यन्ते ॥ ६६ ॥

भोगाय पामराणां योगाय विवेकिनां शरीरमिदम् ।
भोगाय च योगाय च न कल्पते दुर्विदग्धानाम् ॥ ६७ ॥

ब्राह्मणचण्डाला इत्याह मनुर्यन्महापथिकान् ।
भवमार्गमहापथिकानधिकृत्यैव प्रवृत्तं तत् ॥ ६८ ॥

एकद्वाः क्षितिपतिषु द्वित्रा देवेषु पञ्चषा द्रुहिणे ।
एतावन्तो जगति ब्रह्मानन्दार्णवस्य कणाः ॥ ६९ ॥

अज्ञानेनापिहिते विज्ञाने कर्म किं कुरुते ।
विकले चक्षुषि तमसा व्यादाय मुखं किमेक्षेत ॥ ७० ॥

अतिकलुषमाशुनश्वरमापातस्फुरणमनभिलापकरम् ।
अपि हृष्यन्ति जनाः कथमवलम्ब्य ज्ञानखद्योतम् ॥ ७१ ॥

प्रयुतं नियुतं वापि प्रदिशन्ति प्राकृताय भोगाय ।
क्रीणन्ति न बिल्वदलैः कैवल्यं पश्चषैर्मूढाः ॥ ७२ ॥

यावत्किल चेष्टन्ते तावत्पाशेन बध्यते ग्रन्थिः ।
निभृतं यदि वर्तन्ते कालेन स्रंसते पाशः ॥ ७३ ॥

उपरुन्धन्ति श्वासान्मुनयो नाश्नन्ति न पिबन्ति ।
स्तूयन्ते किं मुनयः कण्ठे कुर्वन्ति कनकपाशमिमे ॥ ७४ ॥

कामं जनाः स्मयन्ते कैलासविलासवर्णनावसरे ।
साधनकथनावसरे साचीकुर्वन्ति वक्त्राणि ॥ ७५ ॥

वङ्गाः कथमङ्गाः कथमित्यनुयुङ्क्ते वृथा देशान् ।
कीदृक्कृतान्तपुरमिति कोऽपि न जिज्ञासते लोकः ॥ ७६ ॥

त्यक्तव्यो ममकारस्त्यक्तुं यदि शक्यते नासौ ।
कर्तव्यो ममकारः किं तु स सर्वत्र कर्तव्यः ॥ ७७ ॥

पुत्रा इति दारा इति पोष्यान्मूर्खो बहिर्जनान्ब्रूते ।
अन्धे तमसि निमज्जन्नात्मा पोष्य इति नावैति ॥ ७८ ॥

यच्चिन्तितमधिगर्भं यच्च चिरं चिन्तितं नरके ।
विषयानिलसंसर्गान्ममृजे तत्सर्वमेकपदे ॥ ७९ ॥

बाह्यगतागतशीला प्राणस्य श्वासलक्षणा वृत्तिः ।
कर्षति मनसो वृत्तिं कुलटेव कुलस्त्रियं मुग्धाम् ॥ ८० ॥

अतिगम्भीरमनाविलमक्षोभ्यमदृष्टपारमविलङ्घ्यम् ।
अविरलतरङ्गसंकुलमैक्षिषि विज्ञानसागरं महताम् ॥ ८१ ॥

घोरं भवमपहातुं कतिचिदघोरं भवं प्रपद्यन्ते ।
संसरणकातराणां संसरणं शांभवी भक्तिः ॥ ८२ ॥

पाशो यदि मोक्तव्यः पशुपतिरेवानुसर्तव्यः ।
न खलु व्यतिमुच्यन्ते पशवः पाशेन संबद्धाः ॥ ८३ ॥

अलमलमनुभूताभिर्मातृभिरलमस्तु पितृभिश्च ।
भवितव्यं यदि नित्यवदर्धं मातुः पितुश्चास्तु ॥ ८४ ॥

धन्यास्ते बहुदेवाः स्वामिनि येषां न दुर्भिक्षम् ।
जातु न जानीमो वयमेकमपि स्वामिनं पूर्णम् ॥ ८५ ॥

सन्तु बृहन्तो देवाः किं तु न तान्नन्तुमीहते चेतः ।
आढ्यवदान्यन्यायादन्तकजितमेव चिन्तयते ॥ ८६ ॥

निध्यायसि विषयसुखं न ध्यायसि विषममस्य परिपाकम् ।
बन्धुं तमेव चिन्तय बन्द्धुं मोक्तुं च यः क्षमते ॥ ८७ ॥

सदनं गुरूपसदनं चरणं पञ्चाक्षरीपुरश्चरणम् ।
धनमभिलाषनिरोधनमत्याश्रमवर्तिनां पुंसाम् ॥ ८८ ॥

स विधिर्यत्ते विदधति स प्रतिषेधो यतो निवर्तन्ते ।
सोपनिषद्यद्ब्रुवते शैवाश्रमवर्तिनो धीराः ॥ ८९ ॥

कौ पितरौ यौ जगतां कः स्वामी यः प्रपञ्चस्य ।
प्रत्यस्तमिते भेदे तत्किमिदं किमिति कः प्रश्नः ॥ ९० ॥

त्यज संसारमसारं भज शरणं पार्वतीरमणम् ।
विश्वसिहि श्रुतिशिखरं विश्वमिदं तव निदेशकरम् ॥ ९१ ॥

भव्यमभव्यं वा नः प्रलिखतु वेधाः सुदुर्मेधाः ।
सव्यमसव्यं वा नश्शरणं शरणं महेशस्य ॥ ९२ ॥

वेधाः कथं हरिः कथमिति तु प्रश्ने वयं मूकाः ।
शिवमेकं जानीमस्तस्मादन्यं न जानीमः ॥ ९३ ॥

दारुणमसिपत्रवनं दारुणतममन्धतामिस्रम् ।
का वा ततः क्षतिर्नः शैवा वयमा चतुर्वदनात् ॥ ९४ ॥

कृतदीक्षो घोरमखे कुलकूटस्थो भरद्वाजः ।
विद्येश्वरेषु कश्चन पितामहो न इति विस्रम्भः ॥ ९५ ॥

कलहः कदापि मास्त्विति कलितशरीरैक्ययोः शिवयोः ।
अहमस्म्यहमस्मीति प्राप्तः कलहो मम त्राणे ॥ ९६ ॥

नरकायापि न भोगान्नराधमायापि नान्यसुरान् ।
मन्यन्ते कतिचिदमी माहेश्वरमाश्रिता योगम् ॥ ९७ ॥

ज्ञातुं हातुं विषयं श्रोतुं मन्तुं ग्रहीतुमात्मानम् ।
वत्सा यदि न हि घटते तत्साधयताविमुक्ताय ॥ ९८ ॥

सांख्यं योगो नियमा भक्तिः कर्म प्रपत्तिरिति ।
एकत्र सकलमेतत्केवलमविमुक्तमेकत्र ॥ ९९ ॥

बद्धः कस्ते वक्ष्यति
मुक्तो मुक्तिं न जानाति ।
यास्यसि चेदविमुक्तं
ज्ञास्यसि विश्वेश्वरस्य मुखात् ॥ १०० ॥

न ग्रहीतं श्रुतिहृदयं
न च निगृहीतं परिप्लवं हृदयम् ।
इच्छामि च धाम परं
गच्छामि च विश्वनाथपुरम् ॥ १०१ ॥

इति श्रीनीलकण्ठदीक्षितविरचितं
वैराग्यशतकं संपूर्णम् ॥



# आनन्दसागरस्तवः

*N. 5

॥ श्रीः ॥

# ॥ आनन्दसागरस्तवः ॥

विज्ञापनार्हविरलावसरानवाप्त्या
मन्दोद्यमे मयि दवीयसि विश्वमातुः ।
अव्याजभूतकरुणापवनापविद्धा-
न्यन्तः स्मराम्यहमपाङ्गतरङ्गितानि ॥ १ ॥

आवेद्यतामविदितं किमथाप्यनुक्तं
वक्तव्यमान्तररुजोपशमाय नालम् ।
इत्यर्थ्यसे किमपि तच्छ्रवणे निधातुं
मातः प्रसीद मलयध्वजपाण्ड्यकन्ये ॥ २ ॥

आक्रन्दितं रुदितमाहतमानने वा
कस्यार्द्रमस्तु हृदयं किमतः फलं वा ।
यस्या मनो द्रवति या जगतां स्वतन्त्रा
तस्यास्तवाम्ब पुरतः कथयामि खेदम् ॥ ३ ॥

पर्याकुले मनसि वाचि परिस्खलन्त्या-
मावर्तगर्त इव चक्षुषि घूर्णमाने ।
कस्तेऽभिधास्यति शिवे मम तामवस्थां
काले दयस्व कथयामि तवाधुनैव ॥ ४ ॥

भक्तिं करोतु नितरां सुरजातिमात्रे
ग्रामीणजन्तुरिव पौरजनेषु लोकः ।
अन्यत्र देवि भवदीयपदारविन्दा-
दाकृष्यमाणमपि मे हृदयं न याति ॥ ५ ॥

अङ्गीकुरु त्वमवधीरय वा वयं तु
दासास्तवेति वचसैव जयेम लोकान् ।
एतावतैव सुकरो ननु विश्वमात-
रुद्दण्डदण्डधरकिंकरमौलिभङ्गः ॥ ६ ॥

वेदान्तवाक्यजनितं विमलं विचारै-
रासाद्य बोधमनुचिन्तनतोऽपरोक्षम् ।
मुक्तिं व्रजन्ति मनुजा इति सूक्तिमाद्या-
मालम्ब्य कस्तरितुमर्हति शैलकन्ये ॥ ७ ॥

एकैकवेदविषयाः कति नाम शाखा-
स्तासां शिरांसि कति नाम पृथग्विधानि ।
अर्थावबोधविधुरोऽक्षरलाभ एव
केषां नृणां कतिभिरस्तु शरीरबन्धैः ॥ ८ ॥

न्यायाः परस्परविभिन्नदिशः सहस्र-
मुच्चावचानि च भवन्त्युपबृंहणानि ।
एवं स्थिते गिरिसुते निगमोपलानां
तात्पर्यसारमवधारयितुं क्षमः कः ॥ ९ ॥

अस्त्वक्षरग्रहविधिर्जनुषां सहस्रै-
रापाततो भवतु वापि ततोऽर्थबोधः ।
दुर्वादिकल्पितविकल्पतरङ्गसान्द्रा-
न्दुष्पूर्वपक्षजलधीन्कथमुत्तरेयुः ॥ १० ॥

ब्रह्मेति शक्तिरिति बन्धविमोचनीति
मायामयीति मदनान्तकवल्लभेति ।
सप्ताष्टशब्दपरिवर्तनमात्र एव
सामर्थ्यमावहति शास्त्रपरिश्रमोऽयम् ॥ ११ ॥

तस्मै प्रसीदसि गिरीन्द्रसुते य इत्थं
संपादयेत शनकैरपरोक्षबोधम् ।
यस्मै प्रसीदसि स च क्षमतेऽवबोद्धु-
मित्थं परस्परसमाश्रयमेतदास्ते ॥ १२ ॥

आकर्णय त्वमिममभ्युपगम्य वादं
जानातु कोऽपि यदि वा हृदयं श्रुतीनाम् ।
तस्याप्यसंख्यभवबन्धशतार्जितोऽयं
द्वैतभ्रमो गलतु जन्मशतैः कियद्भिः ॥ १३ ॥

काले महत्यनवधावपतन्कदापि
क्वाप्यन्तिमे जनुषि कोऽपि गतिं लभेत ।
इत्थं समर्थनविधिः परमागमानां
पर्यायसूक्तिविधया नयनं नव्यर्थे ॥ १४ ॥

एकापवर्गसमये जगतोऽपवर्गः
सर्वापवर्गसमये पुनरस्तशङ्कः ।
ईदृग्विधं कमपि पक्षमिहावलम्ब्य
स्थातुं सुखं क्षममनेन पथा प्रवृत्तैः ॥ १५ ॥

अभ्यस्य वेदमवधाय च पूर्वतन्त्र-
मालक्ष्य शिष्टचरितानि पृथग्विधानि ।
अध्यापनादिभिरवाप्य धनं च भूरि
कर्माणि मातरलसाः कथमाचरेयुः ॥ १६ ॥

आयस्य तावदपि कर्म करोतु कश्चि-
त्तेनापि मातरधिकं किमिहानुभाव्यम् ।
आस्ते सुखं य इह भारतवर्षसीम-
न्यास्ते स किंचिदित उत्तरतोऽपसृत्य ॥ १७ ॥

कर्म त्यजेम यदि नूनमधः पतेम
यद्याचरेम न कदापि भवं तरेम ।
कर्म त्यजेदिति चरेदिति च प्रवृत्ता
भावेन केन निगमा इति न प्रतीमः ॥ १८ ॥

कर्मण्यकर्मविधिरेष यदाचरन्ति
कर्माणि तत्तदनुबन्धजिहासयेति ।
सत्यं तथाप्यभिनवो भविता न बन्धः
प्राचीनबन्धहरणे क इवाभ्युपायः ॥ १९ ॥

प्रारब्धकर्म कियदारभते कियद्वा
प्रारप्स्यते कियदिदं क इवावधत्ताम् ।
कालः कियानिव मया प्रतिपालनीयो
यस्य क्षणार्धमपि कल्पशतत्वमेति ॥ २० ॥

पुंसः क्षणार्धमपि संसरणाक्षमस्य
सांख्यादयः सरणयो न विशन्ति कर्णम् ।
संख्याय गाङ्गसिकताः सकलाश्च सूक्ष्मा
भुङ्क्ष्वेति वागिव महाक्षुधयार्दितस्य ॥ २१ ॥

भक्तिस्तु का यदि भवेद्रतिभावभेद-
स्तत्केवलान्वयितया विफलैव भक्तिः ।
प्रीतिस्त्वयि त्रिजगदात्मनि कस्य नास्ति
स्वात्मद्रुहो न खलु सन्ति जनास्त्रिलोक्याम् ॥२२॥

आत्मा समस्तजगतां भवतीति सम्य-
ग्विज्ञाय यद्वितनुते त्वयि भावबन्धम् ।
सा भक्तिरित्यभिमतं यदि सिद्धमिष्टं
व्यर्थं विशेष्यमलमस्तु विशेषणं नः २३ ॥

स्वात्मेतरत्वमवधार्य परत्वबुद्ध्या
यत्प्रीयते गुरुजनेष्विव सैव भक्तिः ।
स्यादेतदेवमियमेव तु मे जिहास्या
द्वैतभ्रमात्किमधिकं भवबन्धमूलम् ॥ २४ ॥

सेवैव भक्तिरिति कर्मपथप्रवेशः
सेव्यप्रसादफलका किल कर्मसेवा ।
ध्यानप्रवाह इति चेच्छ्रवणात्तृतीयः
प्रागेव मातरयमाकलितोऽभ्युपायः ॥ २५ ॥

अद्यैव दास्यसि विमुक्तिमथापि याचे
मातः शरीरपतनं मणिकर्णिकायाम् ।
अस्तु स्वकृत्यमनुकम्पनमीश्वराणां
दासस्य कर्मकरतैव तथा स्वकृत्यम् ॥ २६ ॥

सद्यो भवेत्सुकृतिनामुपदेशलाभः
पापात्मनां बहुतिथे समये व्यतीते ।
इत्यादिभिः किल पुराणवचोभिरम्ब
वाराणसीमपि न याचितुमुत्सुकोऽस्मि ॥ २७ ॥

आक्रान्तमन्तररिभिर्मदमत्सराद्यै-
र्गात्रं वलीपलितरोगशतानुविद्धम् ।
दारैः सुतैश्च गृहमावृतमुत्तमर्णै-
र्मातः कथं भवतु मे मनसः प्रसादः ॥ २८ ॥

धन्याः कति त्रिभुवने परमोपभोग्यं
संसारमेव परमेश्वरि भावयन्तः ।
आभासरूपमवबोधमिमं समेत्य
क्लिश्ये कियत्कियदहं त्वमुना भवेन ॥ २९ ॥

का संसृतिः किमपचारनिबन्धनेयं
कीदृग्विधस्य तव किं क्षतमेतयेति ।
प्रश्ने तु नास्मि कुशलः प्रतिवक्तुमेव
खेदस्तु मे जननि कोऽप्ययमेवमास्ते ॥ ३० ॥

एवं गतस्य मम सांप्रतमेतदर्ह-
मत्रेदमौपयिकमित्थमिदं च साध्यम् ।
अस्मिन्प्रमाणमिदमित्यपि बोद्धुमम्ब
शक्तिर्न मे भुवनसाक्षिणि किं करोमि ॥ ३१ ॥

न ज्ञायते मम हितं नितरामुपायो
दीनोऽस्मि देवि समयाकरणाक्षमोऽस्मि ।
तत्त्वामनन्यशरणः शरणं प्रपद्ये
मीनाक्षि विश्वजननीं जननीं ममैव ॥ ३२ ॥

किंचिन्मया श्रुतिषु किंचिदिवागमेषु
शास्त्रेषु किंचिदुपदेशपथेषु किंचित् ।
आघ्रातमस्ति यदतो भवतीं वरीतुं
गोप्त्रीति काचिदुदपद्यत बुद्धिरेषा ॥ ३३ ॥

ब्रह्मैवमेवमहमेष तदाप्त्युपाय
इत्यागमार्थविधुराः प्रथमे दयार्हाः ।
त्वद्रक्षकत्वगुणमात्रविदो द्वितीया
इत्यर्थये सदधिकारनिरूपणाय ॥ ३४ ॥

मातः करोषि ममतां मयि यावदीष-
त्तावद्यते मम ततः किमिवास्ति साध्यम् ।
मामित्थमित्थमुपयुङ्क्ष्व न विस्मरेति
किं स्वामिनं त्वरयते क्वचन स्वभृत्यः ॥ ३५ ॥

त्याज्यं त्यजानि विहितं च समाचराणि
नित्येषु शक्तिमनुरुध्य हि वर्तितव्यम् ।
तद्बुद्धिशक्तिमनुरुध्य न कार्यशक्ति-
मित्येतदेव तु शिवे विनिवेदयामि ॥ ३६ ॥

आत्मैव भार इति तं त्वयि यो निधत्ते
सोऽङ्गानि कानि कलयत्वलसः प्रपत्तेः ।
विश्वत्र सात्र सविलक्षणलक्षणाया
विस्रम्भसंपदियमेव समस्तमाङ्गि ॥ ३७ ॥

त्वत्प्रेरणेन मिषतः श्वसतोऽपि मातः
प्रामादिकेऽपि सति कर्मणि मे न दोषः ।
मात्रैव दत्तमशनं ग्रसतः सुतस्य
को नाम वक्ष्यति शिशोरतिभुक्तिदोषम् ॥ ३८ ॥

मुक्तिं सिसाधयिषतां निजयैव बुद्ध्या
प्रारब्धकर्म भवतु प्रतिबन्धहेतुः ।
त्वामेव साधनतयापि समाश्रितानां
तुल्यं तदम्ब यदि कस्तव वीरवादः ॥ ३९ ॥

प्रारब्धकर्म गिरिजे भवदाश्रिताना-
मन्यत्र संक्रमय नाशय वा समूलम् ।
मर्त्याश्च खल्वपि विषं वपुषि प्रसक्तं
संक्रामयन्ति परतोऽपि च नाशयन्ति ॥ ४० ॥

त्वद्दर्शनश्रवणवन्दनचिन्तनादि-
ष्वक्षाणि देवि विनियुज्य यथाधिकारम् ।
रक्षेत्यसंख्यभवसंभृतयैव मैत्र्या
रुन्ध्यां यदि स्थिरममून्यधुनैव न स्युः ॥ ४१ ॥

त्रातव्य एष इति चेत्करुणा मयि स्या-
त्त्रायस्व किं सुकृतदुष्कृतचिन्तया मे ।
कर्तुं जगत्तिरयितुं च विशृङ्खलायाः
कर्मानुरोध इति कं प्रति वञ्चनेयम् ॥ ४२ ॥

त्वय्यर्पितं प्रथममप्पययज्वनैव
स्वात्मार्पणं विदधता स्वकुलं समस्तम् ।
का त्वं महेशि कुलदासमुपेक्षितुं मां
को वानुपासितुमहं कुलदेवतां त्वाम् ॥ ४३ ॥

मौढ्यादहं शरणयामि सुरान्तरं चे-
त्किं तावता स्वमपि तस्य भवामि मातः ।
अज्ञानतः परगृहं प्रविशन्परस्य
स्वत्वं प्रयास्यति पशुः किमु राजकीयः ॥ ४४ ॥

आधाय मूर्धनि वृथैव भरं महान्तं
मूर्खा निमज्जथ कथं भवसागरेऽस्मिन् ।
विन्यस्य भारमखिलं पदयोर्जनन्या
विस्रब्धमुत्तरत पल्वलतुल्यमेनम् ॥ ४५ ॥

क्वेदं पतिष्यति वपुः क्व ततो नु गम्यं
को दण्डयिष्यति कियन्तमनेहसं वा ।
किं तस्य संतरणसाधनमित्यनन्ता
चिन्ता स्थिता त्वयि शनैरवतारिता सा ॥ ४६ ॥

ज्ञानं दिशेयमुत तेन विनोद्धरेयं
प्रारब्धमप्यपलपेयमुतानुरुन्ध्याम् ।
इत्थं सकृत्प्रपदनैकवशंवदाया
मातर्मयि प्रववृते महतीह चिन्ता ॥ ४७ ॥

एतज्जडाजडविवेचनमेतदेव
क्षित्यादितत्त्वपरिशोधनकौशलं च ।
ज्ञानं च शैवमिदमागमकोटिलभ्यं
मातुर्यदङ्घ्रियुगले निहितो मयात्मा ॥ ४८ ॥

षट्त्रिंशदावरणमध्यजुषि त्वदङ्घ्रौ
हालास्यनाथदयिते निहितो मयात्मा ।
भूभूतलत्रिदशवर्तिषु कः क्षमेत
तच्चक्षुषापि निभृतेन निरीक्षितुं माम् ॥ ४९ ॥

बन्धं हरिष्यसि सुखं वितरिष्यसीति
निश्चप्रचं निखिलमम्ब तदास्त एव ।
संप्रत्यहं त्वयि निधाय भरं समस्तं
यन्निर्वृणोमि किमितोऽपि ममापवर्गे ॥ ५० ॥

काश्यां निपातय वपुः श्वपचालये वा
स्वर्गे नय त्वमपवर्गमधोगतिं वा ।
अद्यैव वा कुरु दयां पुनरायतौ वा
कः संभ्रमो मम धने धनिनः प्रमाणम् ॥ ५१ ॥

नाहं सहे तव कथाश्रवणान्तरायं
नाहं सहे तव पदार्चनविच्युतिं वा ।
मोक्षं दिशैतदविरुद्धमिदं न चेत्स्या-
न्नैवास्तु मातरपवर्गमहोपसर्गः ॥ ५२ ॥

आचूडमाचरणमम्ब तवानुवार-
मन्तःस्मरन्भुवनमङ्गलमङ्गमङ्गम् ।
आनन्दसागरतरङ्गपरम्पराभि-
रान्दोलितो न गणयामि गतान्यहानि ॥ ५३ ॥

पाषाणतोऽपि कठिने शिरसि श्रुतीनां
प्रायः परिभ्रमवशादिव पाटलाभम् ।
अम्ब स्मरेयममृतार्णवमाथलब्ध-
हैयंगवीनसुकुमारमिदं पदं ते ॥ ५४ ॥

ये नाम सन्ति कतिचिद्गुरवस्त्रिलोक्यां
तेषामपि स्वयमुपेतवता गुरुत्वम् ।
पादेन मूर्ध्नि विधृतेन वयं तवाम्ब
संसारसागरमिमं सुखमुत्तरामः ॥ ५५ ॥

साधारणे स्मरजये निटिलाक्षिसाध्ये
भागी शिवो भजतु नाम यशः समग्रम् ।
वामाङ्घ्रिमात्रकलिते जननि त्वदीये
का वा प्रसक्तिरिह कालजये पुरारेः ॥ ५६ ॥

स्यात्कोमलं यदि मनो मम विश्वमात-
स्तत्पादयोर्मृदुलयोस्तव पादुकास्तु ।
स्यात्कर्कशं यदि करग्रहणे पुरारे-
रश्माधिरोहणविधौ भवतूपयोगः ॥ ५७ ॥

प्रस्निग्धमुग्धरुचिपादतले भवत्या
लग्नं दृढं यदिह मे हृदयारविन्दम् ।
एषैव साग्रभुवनद्विशतीपतित्व-
साम्राज्यसूचनकरी तव पद्मरेखा ॥ ५८ ॥

अप्राकृतीं मृदुलतामविचिन्त्य किंचि-
दालम्बितासि पदयोः सुदृढं मया यत् ।
तन्मे भवार्णवनिमज्जनकातरस्य
मातः क्षमस्व मधुरेश्वरि बालकृत्यम् ॥ ५९ ॥

यत्नानमन्पशुपतिः प्रणयापराधे
मन्दं किल स्पृशति चन्द्रकलाञ्चलेन ।
पुष्पार्चनेऽपि मृदितं पदयोर्युगं त-
न्मातस्तुदन्ति न कथं परुषा गिरो मे ॥ ६० ॥

अव्याजसुन्दरमनुत्तरमप्रमेय-
मप्राकृतं परममङ्गलमङ्घ्रिपद्मम् ।
संदर्शयेदपि सकृद्भवती दयार्द्रा
द्रष्टास्मि केन तदहं तु विलोचनेन ॥ ६१ ॥

दिव्या दृशोऽपि दिविषद्ग्रहणोचितानि
वस्तूनि काममवधारयितुं क्षमन्ते ।
त्वन्मात्रवेद्यविभवे तव रूपधेये
त्वद्भाव एष शरणं परिशेषितो नः ॥ ६२ ॥

अस्मिन्महत्यनवधौ किल कालचक्रे
धन्यास्तु ये कतिपये शुकयोगिमुख्याः ।
लीनास्त्वदङ्घ्रियुगले परिशुद्धसत्त्वा-
स्तानात्मनस्तव नखानवधारयामः ॥ ६३ ॥

आ शैशवान्ममतया कलितस्त्वयासा-
वानृण्यमम्ब तव लब्धुमना मृगाङ्कः ।
स्वात्मानमेव नियतं बहुधा विभज्य
त्वत्पादयोर्विनिदधे नखरापदेशात् ॥ ६४ ॥

नान्तः प्रवेशमयते किमपि श्रुतं मे
नास्तिक्यवादशिलया प्रतिरुध्यमानम् ।
तत्पातयाम्यहमिमां महतीमधस्ता-
त्पादोदकेन कियता परदेवतायाः ॥ ६५ ॥

संनाहिभिर्यमभटैः परिवार्यमाणे
मय्यर्भके करुणया स्वयमापतन्त्याः ।
आकर्णयेयमपि नाम विरामकाले
मातस्तवाङ्घ्रिमणिनूपुरशिञ्जितानि ॥ ६६ ॥

ब्रह्मेशकेशवमुखैर्बहुभिः कुमारैः
पर्यायतः परिगृहीतविमुक्तदेशम् ।
उत्सङ्गमम्ब तव दास्यसि मे कदा त्वं
मातृप्रियं किल जडं सुतमामनन्ति ॥ ६७ ॥

ऊरौ शिरस्तव निवेश्य दयावितीर्ण-
संव्यानपल्लवसमीरविनीतखेदम् ।
अत्रैव जन्मनि विभोः परमोपदेश-
माकर्णयेयमपि किं मणिकर्णिकायाम् ॥ ६८ ॥

काञ्चीगुणग्रथितकाञ्चनचेलदृश्य-
चण्डातपांशुकविभापरभागशोभि ।
पर्यङ्कमण्डलपरिष्करणं पुरारे-
र्ध्यायामि ते निखिलमम्ब नितम्बबिम्बम् ॥ ६९ ॥

गर्भे निवेश्य भुवनानि चतुर्दशापि
संरक्षितुं कलितनिश्चितया भवत्या ।
प्राकारमेव रचितं परितोऽपि नून-
मूहे सुवर्णमयमेदुरपट्टबन्धम् ॥ ७० ॥

मुक्ताश्च खल्वपि यदि त्रिपुरे भवत्याः
स्तन्याशया स्तनतटं न परित्यजन्ति ।
अस्माकमुद्भटभवज्वरतापिताना-
मार्द्रीभवन्तु वदनानि कुतो न हेतोः ॥ ७१ ॥

नष्टोपलब्धमधिगत्य शिशुं चिरान्मां
वात्सल्यविद्रुतहृदः परदेवतायाः ।
क्लिद्यत्पयोधरविनिःसृतदुग्धबिन्दु-
निष्यन्दपङ्क्तिरिव दीव्यति हारयष्टिः ॥ ७२ ॥

यत्तद्धनुर्जनमनोमयमैक्षवं ते
तस्यास्तु देवि हृदयं मम मूलदेशः ।
चापाधिरोपणविधौ चरणाञ्चलेन
संभाव्यते किल समाक्रमणं कदाचित् ॥ ७३ ॥

आस्थाय दारुणतरं कमपि स्वभाव-
मत्यन्तदुष्कृतकृतामपि शिक्षणाय ।
गृह्णासि सायकपदे कुसुमान्यमूनि
मातः सुतेषु महती किल रूक्षतेयम् ॥ ७४ ॥

पाशं सृणिं च करयोस्तव भावयन्तः
संस्तम्भयन्ति वशयन्ति च सर्वलोकान् ।
चापं शरं च सकृदम्ब तव स्मरन्तो
भूपालतां दधति भोगपथावतीर्णाः ॥ ७५ ॥

पाशाङ्कुशौ तव करे परिचिन्त्य राग-
द्वेषौ जयन्ति परमार्थविदस्तु धन्याः ।
एकत्र चापमितरत्र शरं च मत्वा
व्यावर्तयन्ति हृदयं विषयान्धकूपात् ॥ ७६ ॥

उत्क्रान्तमान्तरमिदं करणं जनाना-
मप्येति चन्द्रमिति हि श्रुतयो वदन्ति ।
आस्तामिदं मम तु देवि मनोऽधुनैव
लीनं दृढं वदनचन्द्रमसि त्वदीये ॥ ७७ ॥

विद्यात्मनो जननि तावकदन्तपङ्क्ते-
र्वैमल्यमीदृगिति वर्णयितुं क्षमः कः ।
तत्संभवा यदमला वचसां सवित्री
तन्मूलकं कवियशोऽपि ततस्तरां यत् ॥ ७८ ॥

स्वच्छापि ते वहति यत्किल दन्तपङ्क्तिः
स्वच्छन्दनिर्दलितदाडिमबीजशोभाम् ।
तन्मे रजोव्यतिकराधिकपाटलिम्नि
चित्ते परं परिचयादिति चिन्तयामि ॥ ७९ ॥

अर्धं जितं त्रिपुरमम्ब तव स्मितं चे-
दर्धान्तरेण च तथा भवितव्यमेव ।
तच्चिन्तये जननि कारणसूक्ष्मरूप-
स्थूलात्मकत्रिपुरशान्तिकृते स्मितं ते ॥ ८० ॥

मत्क्लेशदर्शनपरिद्रवदन्तरङ्ग-
हैयङ्गवीनपरिवाहनिभं जनन्याः ।
अन्तस्तमोपहमनुस्मरतां जनानां
मन्दस्मितं तव तु मङ्गलमस्तु भूत्यै ॥ ८१ ॥

सांसिद्धिकाननसरोरुहदिव्यगन्ध-
सान्द्रीकृतेन्दुशकलाकलिताधिवासम् ।
ताम्बूलसारमखिलागमबोधसारं
मातर्विधेहि मम वक्त्रकलाचिकायाम् ॥ ८२ ॥

नासामणिस्तव शिवे चिरसंस्तवेन
प्रत्याहृते मनसि भाति तपोधनानाम् ।
अज्ञानसंततिनिशात्ययसूचनार्थ-
माविर्भवन्त्यसुरदेशिकतारकेव ॥ ८३ ॥

ताम्बूलगर्भपरिफुल्लकपोललक्ष्य-
ताटङ्कमौक्तिकमणिप्रतिबिम्बदम्भात् ।
अस्तद्वयव्यतिकरामलसत्त्वमाद्यं
वर्णं बिभर्ति जठरे तव वक्त्रबिम्बम् ॥ ८४ ॥

दत्ते श्रियं बहुविधां कुशलानि दत्ते
दत्ते पदं सुरपतेरपि लीलयैव ।
ईदृग्विधाम्ब तव दृष्टिरितोऽधिका वा
नाद्यापि कर्णमतिवर्तितुमीश्वरीयम् ॥ ८५ ॥

पाषाणकूटकठिने जनदुर्विगाहे
व्यर्थं महत्युपनिषद्विपिने प्रवृत्ता ।
सेव्येत केन तव लोचनचन्द्रिकेय-
मेनां निपातय सकृन्मयि तप्यमाने ॥ ८६ ॥

कामं शिवेन शमितं पुनरुज्जगार
दृष्टिस्तवेति किमियं जननि स्तुतिस्ते ।
लीलाप्रसूतपुरुषार्थचतुष्टयाया-
स्तस्याः परं तु स भवत्यवयुत्यवादः ॥ ८७ ॥

सोमो जगज्जनयितेति यदाह वेदो
नेदं लतापरमिति भ्रमितव्यमार्यैः ।
यः शैववामतनुवर्तिभवद्दृगात्मा
चन्द्रो जगत्सृजति तत्पर एष वादः ॥ ८८ ॥

सूच्यग्रवद्वसुमतीमणुवच्च मेरुं
दृष्टिर्यदम्ब तव पश्यति दानशौण्डा ।
दृष्टास्त्वया वयमपीह ततः स्मरामो
वेशन्तमेव भवसागरमुत्तरङ्गम् ॥ ८९ ॥

वाणीनिकेतनतया घनसारगौराः
कह्लारकेसररुचः कमलानुषङ्गात् ।
मातर्जयन्ति शरणागतलोकचेतो-
मालिन्यमार्जनवशादसिताः कटाक्षाः ॥ ९० ॥

आकर्णमुल्लसति मातरपाङ्गदेशे
कालाञ्जनेन घटिता तव भाति रेखा ।
शैवालपङ्क्तिरिव संततनिर्जिहान-
कारुण्यपूरपदवीकलितानुबन्धा ॥ ९१ ॥

विश्वं सृजत्यवति हन्ति च यत्कटाक्षो
विश्वस्यतां कथमसौ चपलस्वभावः ।
एषोऽपि यामनुसरँल्लभते यशांसि
तामेव विश्वसिमि देवि तवानुकम्पाम् ॥ ९२ ॥

अर्धे कलङ्करहिता करुणैव शंभो-
रर्धे गुणास्तदितरे सकलाः समेताः ।
इत्यम्ब संप्रति किल स्फुरितं रहस्यं
संपश्यतो मम भवन्मयमैशमर्धम् ॥ ९३ ॥

अम्ब भ्रुवोस्तव विचेष्टितमप्रमत्तं
संपश्यतां निजनिजार्थनिदेशहेतोः ।
तन्मूलदेशनिहिता निभृता सुराणां
दृष्टिः प्रयाति मृगनाभिविशेषकत्वम् ॥ ९४ ॥

सारं कणं कणमघर्मरुचां सहस्रा-
त्संगृह्य निर्मितमिदं तव वक्त्रबिम्बम् ।
तावत्सुधाकरकलङ्ककुलानि पश्चा-
दन्यत्र देवि निहितानि कचापदेशात् ॥ ९५ ॥

विन्यस्तमिन्द्रमणिकंदलसुन्दरेषु
केशेषु ते स्फटिकनिर्मलमिन्दुखण्डम् ।
आधारसंगतिवशादसितायमान-
मिन्दीवरच्छदवतंसदशां बिभर्ति ॥ ९६ ॥

चिन्तामणिस्त्रिभुवनेश्वरि कौस्तुभश्च
ख्यातौ मणी तव गृहाङ्गणकुट्टिमस्थौ ।
किं रत्नमन्यदुपलभ्य किरीटकोटिं
वाचस्पतिप्रभृतयस्तव वर्णयन्तु ॥ ९७ ॥

प्रादुर्भवत्तरणिबिम्बशतारुणानि
पर्याप्तशीतकिरणायुतशीतलानि ।
शृङ्गारसारपरिवाहमयानि मात-
रङ्गानि केऽपि चरमे जनुषि स्मरन्ति ॥ ९८ ॥

प्रत्यग्रकुङ्कुमरसाकलिताङ्गरागं
प्रत्यङ्गदत्तमणिभूषणजालरम्यम् ।
ताम्बूलपूरितमुखं तरुणेन्दुचूडं
सर्वारुणं किमपि वस्तु ममाविरस्तु ॥ ९९ ॥

अर्धे स्त्रियस्त्रिभुवने सचराचरेऽस्मि-
न्नर्धं पुमांस इति दर्शयितुं भवत्या ।
स्त्रीपुंसलक्षणमिदं वपुरावृतं य-
त्तेनासि देवि विदिता त्रिजगच्छरीरा ॥ १०० ॥

निर्मासि संहरसि निर्वहसि त्रिलोकीं
वृत्तान्तमेतमपि वेत्ति न वा महेशः ।
तस्येश्वरस्य गिरिजे तव साहचर्या-
ज्जातः श्रुतिष्वपि जगज्जनकत्ववादः ॥ १०१ ॥

सत्तास्यखण्डसुखसंविदसि त्रिलोकी-
सर्गस्थितिप्रतिहृतिष्वपि निर्व्यपेक्षा ।
त्वामन्तरेण शिव इत्यवशिष्यते कि-
मर्धं शिवस्य भवतीत्यनभिज्ञवादः ॥ १०२ ॥

नास्मिन्रविस्तपति नात्र विभाति वातो
नास्य प्रवृत्तिमपि वेद जगत्समस्तम् ।
अन्तःपुरं तदिदमीदृशमन्तकारे-
रस्मादृशास्तु सुखमत्र चरन्ति बालाः ॥ १०३ ॥

त्वत्संनिधानरहितो मम मास्तु देश-
स्त्वत्तत्त्वबोधरहिता मम मास्तु विद्या ।
त्वत्पादभक्तिरहितो मम मास्तु वंश-
स्त्वच्चिन्तया विरहितं मम मास्तु चायुः ॥ १०४ ॥

त्वं देवि यादृगसि तादृगसि त्वमीदृ-
गेवेति वक्तुमिव बोद्धुमपि क्षमः कः ।
मामेव तावदविदन्नतिपामरोऽहं
मातः स्तुतिं त्वयि समर्पयितुं विलज्जे ॥ १०५ ॥

काचित्कृता कृतिरिति त्वयि सार्पितेति
कापि प्रमोदकणिका न ममान्तरङ्गे ।
मौढ्यं मदीयमिह यद्विदितं ममैव
किं त्वम्ब विश्वसिमि दीनशरण्यतां ते ॥ १०६ ॥

कालानपास्य विषुवायनसंक्रमादी-
नस्तंगते हिमकरे च दिवाकरे च ।
अम्ब स्मरेयमपि ते चरणारविन्द-
मानन्दलक्षणमपास्तसमस्तभेदम् ॥ १०७ ॥

चतुरध्यायीरूपं कलहंसव्यञ्जनं जगन्मातुः ।
अपरब्रह्ममयं वपुरन्तः शशिखण्डमण्डनमुपासे ॥१०८॥

इति श्रीनीलकण्ठदीक्षितविरचितः
आनन्दसागरस्तवः संपूर्णः ॥

# अन्यापदेशशतकम्

॥ श्रीः ।

# ॥ अन्यापदेशशतकम् ॥

छायावृक्षमुपाश्रयन्ति पथिषु श्रान्ता हि पान्थाः समं
तेष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन्ननुध्यायति ।
अन्यो भङ्गमपेक्षतेऽस्य विटपानाधारयष्टेः कृते
कश्चिन्निश्चिनुते कवाटफलकं कर्तुं तमेव क्षणात् ॥ १ ॥

श्वानः सन्त्यभितोऽपि दन्तमुकुलव्यावर्तनोत्पाटित-
स्वैरोत्तानितविड्वराहपृथुकाः किं तैः स्थितैर्वा मृतैः ।
वस्तव्यं गिरिराजमौलिषु विहर्तव्यं पुनः स्वेच्छया
हन्तव्याः करिणो मृगेन्द्र इति च प्राप्तव्यमुच्चैर्यशः ॥

किं पुष्णासि मृगान्मृगादनकुलात्किं वा परित्रायसे
त्वद्भाग्येन तथाप्यमी वनभुवि स्वैरं चरित्वा तृणम् ।
त्वां राजानमुपासितुं यदि किल श्रद्धां निबध्नन्ति त-
त्किं पारीन्द्र गुहागृहादपि विनिर्गन्तुं तवैष श्रमः ॥ ३ ॥

उन्मुच्य स्वजनानुपेक्ष्य तृणवत्प्राणानपि प्रेयस-
स्तीर्त्वा दुस्तरमर्णवं च वणिजः प्राप्ताः पटीराशया ।
श्वासैस्ते विनिवर्तिताः प्रतिभयैः स्वस्थो भवातः परं
त्वं वा केवलमङ्गमङ्गमुरग व्यालिम्प गन्धद्रवैः ॥ ४ ॥

भ्रान्त्वा दिग्वलभीर्विचित्य विपिनान्यासाद्य दैवादिह
क्वापि क्वापि मुखेन केवलमथैकैकां शलाकां हरन् ।
कृत्वा नीडकुटीं चिरात्तरुशिरस्यध्यास्त यावन्न तां
काकस्तावदहो तदेव विपिनं दग्धं दवज्वालया ॥ ५ ॥

नाम्भोजाय शशी न चापि शशिने यद्रोचतेऽम्भोरुहं
किं तेन क्षतमस्ति किंचन जगत्येतस्य वा तस्य वा ।
लोकानन्दकयोः परं त्विह तयोः प्रेम्णैव भाव्यं मिथ-
स्तच्चेन्नाजनि तत्प्ररूढमयशः स्फारं विधेः केवलम् ॥६॥

अस्तप्रत्युपकारगन्धमकृतस्वप्रार्थनापेक्षम-
प्यम्भोभिर्भुवमार्द्रयन्ति जलदा जीवन्त्यतो जन्तवः ।
दैवज्ञः पुनरस्ति वृष्टिरिति वागेका मयोक्तेति य-
द्विश्वं क्रीतमिवाधिगच्छति तदेवाघूर्णते मर्माणि ॥ ७ ॥

अस्ति स्वादु फलं किमस्ति किमथ घ्रातुं क्षमः कोरक-
स्ताद्विश्राम्यतु नाम भोक्तुमुचितं पत्त्रं किमस्त्यन्ततः ।
सेव्यो हन्त यदीदृशोऽपि मनुजैर्वृक्षाधमः पिप्पलो
दुःस्वातन्त्र्यमिदं विधेः कथयतः कस्याग्रतो रुद्यताम् ॥

सर्वासां सरितां पतिर्यदि यदि व्याप्ताः समस्ता दिशः
कल्पान्तेष्वपि वा न शुष्यति यदि स्वैरं तदङ्गीकृतम् ।
अम्भः स्वादु पिपासतः पथि परिश्रान्तस्य पान्थस्य किं
तेन स्यात्फलमर्णवोऽयमिति चेदिन्दुग्रहे स्नास्यते ॥

स्थित्वा तीरभुवि प्रसार्य सरसि स्वैरं कराग्रं पयः
पातव्यं पिब तावता न विरमेद्दन्तीन्द्र किं ते तृषा ।
उन्मृद्नासि तटीरपः कलुषयस्युन्मूलयस्यब्जिनी-
र्हानिः कस्य तवैव मृग्यमुदकं भ्रातः पुनस्तृष्यतः ॥

को दोषः परतो गते मधुकरे क्षीतः किमेष त्वया
क्रीतेनापि किमास्यते क्वचिदिह ग्लानोदरेण क्षणम् ।
जानास्येवमथापि चेत्क्षिपसि तं कर्णानिलैर्दूरतो
दुर्धर्षोऽसि निरङ्कुशोऽसि भवतो मत्तेभ वक्तेत्र कः ॥

नेतव्यः समयः कियानिव सखे काक त्वया भ्राम्यता
हंसीभूय सुखेन भुङ्क्ष्व नलिनीनालानि पद्माकरे ।
व्यावर्तव्यमिहास्ति किं विमलता किंचित्तु कार्या तनो-
र्हंसत्वे यदि ते जनो विवदते दण्ड्योऽहमस्म्यग्रतः ॥

किं त्वं दोहदमीहसे किमुदकैः सिक्तोऽसि किं केनचि-
द्बद्धस्ते सकृदालवालवलयः किं ते मही संस्कृता ।
द्विक्षिः पुष्यसि वासरस्य न गुणान्धुत्तूर ते निह्नुवे
दुर्गन्धो न भवेदियान्यदि ततस्त्वं पारिजातोऽसि नः ॥

गन्तव्यं जलमध्य एव गतवन्मन्तव्यमेतद्वपुः
क्षन्तव्या लवणानिला इति कृतं निर्विद्य सांयात्रिक ।
अन्तर्वेश्मनि हंसतूलशयने सुप्त्वा सुखं जाग्रतो
हस्ताग्रे धनमेष्यति स्वयमिति भ्रातः किमास्ते हृदि ॥

आसीनः सुखमापणे यदि वणिक्श्रद्धालुभिः प्रार्थितः
किंचिच्छंसति पञ्चकं शतकमित्येतन्न तस्याद्भुतम् ।
आपातालविघूर्णिताम्भसि चलत्यौत्पातिके मारुते
मज्जन्त्यामपि नावि मुञ्चति न यस्तामेव मूल्यस्थितिम् ॥

विद्धं मर्मसु येन येन गरलोन्मिश्रा गिरः श्राविता
जज्वाल ज्वलनाख्यवान्निशि निशि क्रूरैः करैर्यः सदा ।
सर्वे ते सुहृदो बभूवुरधुना सङ्गे मिथः कामिनो-
दौर्जन्यस्य विभावनात्परिणतौ दूती परं दूषिता ॥

संनद्धेषु पयोधरेषु चलिते मन्दं पुरोमारुते
कादम्बैः कमलाभिमानिभिरपि त्यक्त्वा सरः प्रस्थिते ।
मिथ्यारोपितपौरुषैर्मधुकरैर्मुग्धैर्यदध्यासितं
तस्येदं फलमम्भसा प्रवहता सैवाब्जिनी मज्जिता ॥

संत्यक्ता यदि केतकी त्रिभुवनश्लाघ्या पुरद्रोहिणा
तस्मिन्नेव हि पर्यवस्यति ततो वस्तुष्वसारज्ञता ।
किं वेणीषु न तां वहन्ति सुदृशः किं सा न विक्रीयते
किं नेमामुपलालयन्ति रसिकाः पृथ्वीभुजो मौलिभिः ॥

कोणे क्वाप्यवतीर्य गात्रमभितः सिक्त्वा पयःशीकरै-
रास्वाद्योदकमागतोऽस्मि पुनरित्यास्ते गजस्याशये ।
कासारस्य दशा त्वसौ कलुषितान्यम्भांसि भग्नास्तटाः
प्रध्वस्ता नलिनी किमत्र बहुना खातव्यमास्ते पुनः ॥

द्यौरित्थं क्षितिरित्थमित्थमुदधेर्मुद्रेति कृत्वा स्थितिं
विश्वस्याहनि विश्रमाय शयितुं प्रारम्भि धात्रा यदा ।
दग्धं चण्डकरैस्तदैव पवनैरौत्पातिकैः शोषितं
मेघैः प्लावितमद्भुतैरपि जगत्स्रष्टव्यमासीत्पुनः ॥ २० ॥

स्वस्ति स्वागतमास्यते सुखममी जाताः कुतः पल्लवाः
हन्तासन्कुसुमान्यपीह किमतो माध्वी च तत्रेक्ष्यते ।
किं भृङ्गा अपि सन्ति साधु शिरसि न्यस्तं पदं शाखिनां
धुत्तूरास्ति न दुर्लभं किमपि ते यावद्वसन्तः सुखी ॥

दृष्टाश्चन्द्रसमुद्गमाः शतमतिक्रान्ताः शतं प्रावृषः
सीमामेष न जात्वलङ्घत किलेत्यब्धिर्न विश्वस्यताम् ।
योऽसौ शेत इवायमेव विधिना वामेन चेच्चाल्यते
का सीमेति तदास्ति के जनपदाः का मेदिनी का दिशः ॥

सर्वत्र स्रवतोऽस्य किंचिदुदकं दिष्ट्या मुहूर्ते क्वचि-
च्छुक्तीनामुदरेषु मौक्तिकमभूत्काले कदाचित्किल ।
अद्यत्वेऽपि तथा करोतु पटुता यद्यस्ति तद्दूरतः
शुष्कैरेव तु गर्जितैर्व्यथयति श्रोत्राणि धाराधरः ॥

आयुस्ते कियदस्ति तत्र च कियत्तारुण्यमत्रापि ख-
ल्वर्धं निर्गलितं निशात्मकतया यत्रास्ति सङ्गो न ते ।
शेषाः सन्ति कति क्षणाः प्रणयजस्तत्रापि कोपो यदि
व्यर्थं निश्चिनु चक्रवाकि जननं कस्ते हितं वक्ष्यति ॥

सर्वेषां विदिताः सुधाकरकराः साक्षात्सुधारूपिणः
संदेहोऽपि न तद्भुजः सुमनसो जाता अमर्त्या इति ।
तानेव ह्युपभुञ्जते प्रतिनिशं दीनाश्चकोरा इमे
क्षीयन्ते तृणवच्च को नु गहनां जानातु धातुर्गतिम् ॥

अर्चामः सततं गणाधिपमथाप्याखून्निहन्मः शतं
ध्यायामो हृदि भैरवं तदपि तु प्रोत्सारयामः शुनः ।
भूतेशं प्रणुमस्तथापि शतशो भूतान्निगृह्णीमहे
न ह्येकस्य गुणः परस्य महतो दोषानपि प्रोर्णुते ॥

अन्तः क्षोभकृतः कतीह तिमयः कत्युच्छ्रिताः पर्वताः
कीदृक्चान्तरबिन्धनो हुतवहः कीदृक्च नौकागतिः ।
आगच्छत्प्रतिगच्छदुच्चलदुपाश्लिष्यत्प्रधावत्पत-
त्कल्लोलारभटीभिरेव जलधेः सर्वं तदाच्छाद्यते ॥ २७ ॥

जामाता कमलाक्ष एव गृहिणी गङ्गा जगत्पावनी
शीतांशुप्रमुखाः सुता भगवती श्रीरेव कन्या स्वयम् ।
ईदृक्के गृहमेधिता त्रिभुवनाधारस्य वारांनिधे
कः शक्नोति जनो मनोरथपथेऽप्येतावदुत्प्रेक्षितुम् ॥

यन्मूले निखिलागमानुपदिशत्तत्त्वं परं शांकरं
यत्पर्णे जगतां निधिः स तु वटो नाम्नापि न स्वीकृतः ।
यच्छाखानिलयः पिशाचनिचयो यन्मूलगाः पन्नगा-
स्तस्याश्वत्थतरोः पुनः कति नमस्काराः कति प्रार्थनाः ॥

आगच्छन्त्यवगुण्ठयन्त्यथ पुनः पश्यन्ति जिघ्रन्ति च
स्वारब्धं मधु मक्षिका न कणमप्यस्य स्वयं भुञ्जते ।
धन्यस्त्वन्य उपेत्य निर्दयममूरुत्सारयन्दूरतः
स्वादं स्वादमिदं स्वसंभृतमिव स्वच्छन्दमानन्दति ॥

आसन्नो मधुरागतं वनभुवः साम्राज्यमित्यद्भुताः
श्रूयन्ते गिर एव तत्त्वमिह तु ज्ञातुं विधातुः क्षमम् ।
यत्पर्णैस्त्रुटितं यदप्युपरतं पुष्पोद्गमैः शाखिनां
यद्ग्लानं विटपैरिद पुनरिह प्रत्यक्षमालक्ष्यते ॥ २१ ॥

उत्सन्नो मधुरस्ति कोकिलरवैरुत्सन्नमस्त्येतद-
प्युत्सन्नं मलयानिलैरिदमपि प्रागेव जानीमहे ।
पान्थास्तुष्यथ तावतैव किमिति भ्रान्ता यदि प्राणिति
स्तोकेनापि मनोभवो गलतु वः प्राणेषु शुष्को ग्रहः ॥

तिक्तास्ते विटपास्त्वचो यदि ततस्तिक्तास्ततोऽपि च्छदा-
स्तेभ्योऽपि प्रसवास्ततोऽपि च फलान्येवं न दृष्टं क्वचित् ।
स्तौमि त्वामथ वा न निम्ब भवतोऽप्यामीद्यतः संभवः
श्रीमत्तत्किल निम्बबीजमवनौ स्तुत्यं वचःशालिनाम् ॥

चूताः पल्लवमुद्गिरन्ति वितरन्त्येतत्पिकेभ्यस्तत-
स्तेऽप्येतेन कुहूः कुहूरिति कलं कुर्वन्ति कूजामिति ।
निम्बोऽपि स्वयमुद्गिरन्फलमनेनाराधयन्वायसा
न्किंचित्तेषु ततो रटत्सु सफलं जन्म स्वकं मन्यते ॥

भोज्यं स्वादु पयः स्थितिर्मणिगणैरापिञ्जरे पञ्जरे
दूरे चिन्तयितुं च दंशमशकाः पारे गिरां लालनम् ।
सत्यं सर्वमथापि काननभुवि स्वाच्छन्द्यमव्याहतं
ध्यायन्ती विमना मनागपि शुकी नालम्बते निर्वृतिम् ॥

प्राञ्मेघैः कियदम्बु पीतमुदधेः पीतेऽपि वृष्टं किय-
द्वृष्टे चापि कियत्प्रलीनमवनौ पीतं कियत्प्राणिभिः ।
नेदं कश्चन वेद यत्तु किमपि प्रापावशिष्टं पुन-
र्घर्मान्ते सरितां मुखेन तदभूदीर्ष्यास्पदं पश्यताम् ॥

मेघं द्वारतया विधाय भुवनान्याप्लावस्यम्भसा
चन्द्रं द्वारतया विधाय सवितः पुष्णासि सर्वौषधीः ।
यत्त्वीषत्तपसीव तत्तु कुरुषे स्वेनैव तेनाधुना
धातृत्वं घनचन्द्रयोः परिणतं क्रौर्यं तु शिष्टं त्वयि ॥

द्वारं न प्रजहातु जातु नियतं जागर्तु रात्रीरपि
स्वल्पेनापि मुदं प्रयातु किमतः श्वा श्वैव तावानपि ।
संपाद्यो महता धनेन सततं भोज्यश्च सान्त्वैरति
त्यक्त्वा मत्तगजं पदेऽस्य महतः स्थाप्यः किमेतावता ॥

उत्पन्नाः सरितां ह्रदेषु सुचिरं तत्रैव पुष्टास्ततः
प्राप्ता प्रावृषि सागरं जलचरास्तासां मुखादेव ये ।
द्वित्रैरेव दिनैस्तिमिंगिलकुलस्यासाद्य कूटस्थतां
मुष्यन्त्यद्य न ते रहस्यपि कृतां नादेयतासंकथाम् ॥

पन्थाः कर्दमितः पयः कलुषितं हंसाः कृता दूरतः
पीड्यन्ते च यदेवमर्थिन इति क्रूरारवैश्चातकाः ।
सोढाहे तव हे पयोद सकलं शक्नोषि दातुं स्वतः
किं त्वं शीकरमेकमप्युदधिना लोभो यदि स्वीकृतः ॥

सर्वज्ञो यदि शंकरो यदि महादेवो यदि प्रायशो
देवानामपि दैवतं यदि तदप्यास्तामिदं दूरतः ।
धुत्तूरैः फणिभिः कपालवलयैरन्यैश्च ते संगति-
श्चूडाचन्द्रकले न तावदुचिता याचे बहिर्गम्यताम् ॥

अस्यां प्रावृषि चातकैर्जलकणा लब्धा न चेत्किं ततो
भाविप्रावृषि दास्यते द्विगुणमित्यभ्र त्वया गम्यते ।
एतेऽद्यैव लयं व्रजन्ति पृथुकैरेतत्कुलीनोऽपि चे-
देकः प्राणिति तावदेव तदलं तत्रैव न संशयः ॥ ४२ ॥

वर्णस्तेऽतिमनोरमः शिरसि ते वासो मृडानीपतेः
प्रत्येतव्यतरं च काञ्चनमिति प्रौढं पुनर्नाम ते ।
किं कर्तव्यमितःपरं च भवता धुत्तूर लोकाः पुन-
र्न क्रीणन्ति न च स्पृशन्ति न च वा पश्यन्ति गन्धप्रियाः ॥

राज्यं येन कृतं न तस्य शृणुमः कामस्य नामाधुना
येषामेव गिरः पुरा परभृतैस्तैरद्य मौनं धृतम् ।
व्याप्ता येन दिशो न सांप्रतमसौ मन्दानिलः स्पन्दते
किं ब्रूमोऽवतरन्निदाघहतको विश्वं नवं निर्ममे ॥ १४ ॥

पीयन्तां तमसा दिशो विदधतां नीचाः पिशाचाः स्वयं
व्याक्रोशन्तु शिवाः कियच्चिरमसौ कालः सखे स्थास्यति
भूयोदेष्यति भानुरेष्यति दिशमद्य प्रसादो मुखे
ष्वद्य स्वां प्रकृतिं गमिष्यति मही कोक क्षणं क्षम्यताम् ।

मेघा इत्यवतीर्य केऽपि नभसः सर्वं पयो गृह्णते
याद्रांसीति समागतास्तत इतोऽप्यन्ये रमन्ते सुखम् ।
यस्तु स्वान्तिक एव तस्य महस्तालस्य कालाद्गुहोः
शुष्कस्यापि हि नोपयोगकणिकां पश्यामि तेनाब्धिना ॥

आक्रामन्तु तमेव चूतमपि च क्रोशन्तु रेफोत्तरं
डिम्भोऽस्माकमसीति वाभिदधतां काका वराकाः स्वयम् ।
गन्तव्यं क ततोऽन्यतः परभृत क्षन्तव्यमेतावद-
प्यग्रे कस्य निवेद्यतामिदमतिक्रान्तो वसन्तोऽधुना ॥

गन्तव्यं शिशिरेण नाम भवितव्यं नाम चूताङ्कुरै-
स्तानास्वाद्य पिकः करिष्यति तदा नाम स्वयं पञ्चमम् ।
आस्तामेष तथाविधस्त्वमसि किं काक स्वतन्त्रस्य ते
कालोऽयं स्वर एष भोज्यमिदमित्येषा कुतो यन्त्रणा ॥

काका मूर्ध्नि सुखं वसन्ति शतशः शाखासु शाखामृगा
घूकाः कोटरगह्वरेषु मशकैर्दंशैश्च सान्द्रं तलम् ।
आधारः कियतामसि स्थिरतरं शुद्धं च लब्धं यशः
पान्था नोपसरन्ति चेत्क्षतमितः किं वृक्षराजस्य ते ॥

स्निग्धश्यामलकोमलं दलमति प्रच्छायशीतं तलं
भूपर्यन्तविलम्बिजम्भलफलस्थूलं च वृत्तं फलम् ।
संपश्यन्विजने वने व्यवसितस्तत्रैव वस्तुं सुखं
पान्थः पान्थमुखाद्विषद्रुममम्ं दैवादवेत्य द्रुतः ॥ ५० ॥

वर्षन्त्वम्बुमुचस्तपन्तु तपना मथ्नन्तु देवासुरा
बध्नन्तु प्लवगाः पतन्तु सरितो गङ्गादिमाः सर्वतः ।
पुष्णातूत्पलबान्धवः प्रतिनिशं मुष्णातु वा बाडवो
नाब्धिः क्षुभ्यति न प्रसीदति ततो न क्षीयते नैधते ॥

वापीकूपतडागपल्वलसरःस्रोतस्विनीसारणी-
तोयाभ्युद्गमनिर्झरह्रदजलाधारोदपानप्रपाः ।
संपन्ना उपजीव्य यस्य विभवं साक्षात्प्रणाल्यापि वा
तस्मै जीवन जीवनाय सरितामीशाय तुभ्यं नमः ॥

न ह्युष्णो न च शीतलो जलनिधिर्लब्धप्रतिष्ठोऽपि स-
न्कस्त्वस्याः प्रकृतेरमुं चलयितुं शक्तस्त्रिलोकेष्वपि ।
अद्यापि ज्वलतान्तरेव विहितं किं तावदौर्वाग्निना
सायं सायमुदित्वरेण शशिना तत्रैव वा किं कृतम् ॥

राजा विप्रकुलस्य तस्य तनयः सोमः स वारांनिधे-
र्यः सर्वाश्रयणीयपादकमलस्तस्याश्रयोऽयं हरेः ।
आनीतश्चुलुकं स एव चलुकेऽप्यन्तः प्रवेश्येत चे-
त्कः संवेदितुमीहते भगवतः कालस्य लीलायितम् ॥

दुग्धं स्वादु रसादपीह मधुनो दग्धं विषैर्वासुकेः
संवर्तव्रतसाक्षिणो जलचरा मन्थाद्रिणा मारिताः ।
प्राणेभ्योऽप्यधिकाः सुरद्रुममुखाः प्राप्ताः समस्ता व्ययं
किंचिद्रक्षितुमिच्छतामृतमिह क्षीराब्धिना नाशितम् ॥

लब्धा श्रीर्मुरवैरिणा पुरभिदा लब्धः स्वयं चन्द्रमा
देवैरप्सरसो मणिद्विपहयास्तत्स्वामिनैवाहृताः ।
एकस्मै स्वयमेकमेव वितरत्येतेषु चेत्सागर-
स्त्रैलोक्यं वशयेज्जडस्तु स वृथा विक्रम्य तैर्लुण्ठितः ॥

कत्यश्वाः कति धेनवः कति गजाः कत्यद्भुताः पादपाः
सुन्दर्यः कति सुभ्रुवः कति महारत्नान्यनर्घाण्यपि ।
जातैका किल कन्यका जलनिधेर्दातुं प्रसक्ता यदा
सर्वं तद्व्ययितं तदा परिणतौ नामैकमुच्छेषितम् ॥५७॥

प्रागभ्यगतया किमभ्रसरिता संप्लावयन्त्या मही-
मम्भोधिः स्वयमप्यपूर्यत सकृत्तत्तज्जलाधारवत् ।
आस्तेऽयं कथमक्षयो निधिरपां ते ते कथं वासते
निर्व्याजाम्बुधराम्बुदानसुकृतं सिद्धं तदित्थं पुनः ॥

स्नातं शीतलवारि वारिदकुलश्यामाभिरामद्रुमं
पान्थश्रान्तिहरं सरः पथि हृतं दुर्भिक्षमप्यम्भसाम् ।
ये त्वेते भुवि चातका इति कदाप्यज्ञातभौमोदका-
स्ते गृणन्ति न चेदिहाम्बु किमतो दैवेन ते वञ्चिताः ॥

भूमिष्ठा अतिपावनीः सुरभिलाः स्वाद्वीरपः संत्यज-
न्याचत्यम्बुदमम्बु चातकगणो यत्तेन किं साध्यते ।
किं तस्मै द्विगुणं प्रवर्षति घनः किं वा तपः साध्यते
प्राग्जन्मन्यवितीर्णवारिकणिकः पापी स इत्यूह्यते ॥ ६० ॥

स्वादून्येव फलानि सन्ति सुरभीण्येव प्रसूनानि च
स्वान्तं चाप्युपकर्तुमर्हति जने साध्यं वनस्थेन किम् ।
भाग्यं ह्येतदतर्कितं वनतरोः पान्थो यदा तापभ-
श्छायामस्य यदृच्छया फलवतीमध्यास्त गन्धोत्तराम् ॥

पान्थेषु व्ययितं फलं पथिषु यैर्नम्रैः सदा पादपै-
र्यैरप्युन्नतमौलिगोपितफलैः कोणे निलीय स्थितम् ।
दावेन ज्वलता द्वयेऽपि खलु ते निःशेषिताः सांप्रतं
पुण्यं पापमिति स्थितं द्वयमिदं तेषां द्वयानां पृथक् ॥

अध्वन्याः किल मूलगर्तमधुनाप्यापूरयन्त्यश्रुभि-
र्व्याक्रोशन्त्यधुना सबान्धवकुलाः सायं मुहूर्ते द्विजाः ।
इत्थं यावदिमानि बिभ्रति शुचं भूतान्यपि त्वत्कृते
तावत्त्वं न गतोऽसि पादप चिरं कीर्त्यात्मना वर्तसे ॥

जायन्ते विजने वने क्षितिरुहो यद्यप्यमी दुर्भगाः
सर्वे ते वटुभिस्तथापि न तथा बोद्धुं क्षमास्तुल्यवत् ।
आक्रान्तेष्वपि तेषु केषुचिदतिक्रूराक्रियैः श्वापदै-
र्गृह्यन्ते कतिचिद्यतः शमधनैर्ब्रह्मर्षिभिः पावनैः ॥ ६४ ॥

निद्रालस्यशरीरसादवमनान्नद्वेषकासज्वर-
श्वासश्वेतिमहिक्किकाप्रभृतयो मासेषु मातुर्ध्रुवाः ।
जातस्तत्क्षणमेव नश्यतु शतं वर्षाणि वा जीवतु
स्वर्गे वा पितरौ दधातु नरके वा पातयत्वञ्जसा ॥

निघ्नन्तोऽशनिभिस्तडिद्विलसितैश्चक्षुर्हरन्तो नृणां
विध्यन्तश्च शिलाशतैः परिचिताः प्रायेण धाराधराः ।
वर्षन्तो निभृताश्चिरं च समये दृष्टाश्च केचिद्घना
यैरव्याजपरोपकारनिरतैर्जात्या यशः स्थापितम् ॥६६॥

नाक्ष्णोर्गच्छसि गोचरं बहुतिथान्मासान्नभस्ये पुनः
संघीभूय समेत्य वर्षसि निरुच्छ्वासं समन्तादपः ।
कालं कालमनुव्रजन्मितमिता मुञ्चस्यपश्चेत्ततः
किं जीमूत तव प्रणश्यति कियत्प्राणन्त्वतः प्राणिनः ॥

भग्नं भित्तिभिरालयैर्निपतितं स्रोतोभिराप्लावितं
विध्वस्तं पशुभिश्च संघश इति क्रोशन्ति वृष्टे त्वया ।
त्वय्युद्गृह्णति वारि वारिद जना नश्यन्त्यवश्यं क्षणा-
त्कीर्तिं चिन्तय दुर्लभां न गणय क्षुद्रान्गुणान्मादृशाम् ॥

उत्पत्तिर्मलये समुद्रनिलये पन्था वृतो राक्षसै-
स्तत्रत्यानपि हन्त चन्दनतरूंश्छिन्दन्ति सांयात्रिकाः ।
वर्तन्ते सविधस्थिताश्च सुखिनः शाखोटमुख्या द्रुमा-
स्तन्मन्ये कृतिनस्तु ते तरुकुले ये नोपयोगक्षमाः ॥

गृह्यन्तां करिणः प्रसह्य विनिहन्यन्तां वराहा वृका
भल्लूकाश्च तरक्षवश्च पथिकाः सन्तु त्वया निर्भयाः ।
आखून्कङ्क खराञ्शशाननिमिषान्कीटान्पतङ्गानपि
ग्राहं ग्राहमहो कियत्प्रकटयस्याखेटके पाटवम् ॥ ७० ॥

यादोभिर्वडवाग्निना जलनिधेर्यावत्पयो गृह्यते
किं तावत्युपयुज्यते शततमोऽप्यंशः पयोद त्वया ।
सौजन्यं किमिति ब्रवीमि भवतः सर्वस्वमित्थं त्यज-
न्ख्यातः ख्यापयसे पयोधिमपि तं सर्वोपयोगक्षमम् ॥

मेघः कश्चिदचेतनः कियदपि स्वीकृत्य सिन्धोः पयः
कीर्तिं तस्य समुच्चिनोति कियतीं धर्मं कियच्छाश्वतम् ।
ब्रह्मज्ञस्तपसां निधिस्त्रिभुवनख्यातश्च कुम्भोद्भवः
सर्वस्वं विनियुज्य तस्य किमिव श्रेयः समापादयत् ॥

यच्छैलेषु यदर्णवेषु यदपि ग्रामाटवीजाङ्गल-
प्रायासु क्षितिषु क्षिपन्ति बहुशस्तोयं वृथा तोयदाः ।
दृष्टिस्तत्र न दीयतां यदि गुणग्राही भवान्यत्पुन-
र्ग्रामेषूपवनेषु वा सकृदमी वर्षन्ति तद्गृह्यताम् ॥ ७३ ॥

ग्रामेष्वेव सुवृष्टयो विनयवत्स्वेव श्रियः पुष्कला
धीमत्स्वेव कलागमव्यसनिता गोष्वेव दुग्धस्थितिः ।
वाग्मिष्वेव विवक्षुतेति च जगत्प्रार्थ्या व्यवस्थामिमां
किं वेधा विदधे पुरेति शृणुमो रामेऽपि राज्यस्थितिः ॥

उन्मीलन्ति कियन्ति वा न कुसुमान्युष्णद्युतेरुद्गमे
तत्त्वे तावति बन्धुरित्यतिसखीत्यादित्यकान्तेति च ।
कीर्तिं दत्तवतां त्रिलोकविदितामेवं कवीनामृणं
किं कृत्वेयमपाकरोतु जनुषां कोट्यापि नालीकिनी ॥

विद्धं साधु न साध्विव प्लुतमिदं रे रे कथं विध्यसी-
त्याख्यातुं रणकौशलं वयमपि प्रौढाः स्थिता दूरतः ।
आक्रामन्रणमेदिनीमपि वहन्खड्गं विकोशं करे
वेत्ति स्वं च परं च यद्यवहितो विक्रान्तिरेषैव नः ॥

अम्भोजेष्वतिकोमलेषु विहरन्नन्तर्जले संविश-
न्नज्ञातातपवातवर्षमनयत्कालं चिरं यः सुखम् ।
सोऽद्य प्रावृषि केतकीमधिवसन्भृङ्गः क्षतः कण्टकै-
राविद्धः करकोपलैरभिहतो वातैः कथं वर्तते ॥ ७७ ॥

ब्रूते स्वागतमीक्षते कृशममुं श्रुत्वा कथाः खिद्यते
पक्षाभ्यामसकृत्प्रमार्ष्टि रचयत्युच्चावचाश्चाशिषः ।
उच्छिन्नप्रसवात्तरोरुपगते भृङ्गे क्षुधा ताम्यति
प्रस्तौति भ्रमरस्तु पूर्णजठरो नाहारवार्तामपि ॥ ७८ ॥

ये मृष्यन्ति सहासिकामपि बकैर्जात्या न हंसाः स्वत-
स्तेष्वेको जरसा विलुप्तगमनस्त्यक्तः स्वकैः प्रावृषि ।
तानेवानुसरन्बकान्बहुतरं तच्चेष्टितानि स्तुवं-
स्तज्जात्यै स्पृहयन्कियत्कियदहो जातिं निजां निन्दति ॥

शुद्धिं स्वामनुचिन्त्य मीननिवहैः पूर्णेऽपि पद्माकरे
स्वेनैवोपनतैर्मृणालवलयैर्जीवन्ति हंसाः सुखम् ।
ये त्वेते विमलास्ततोऽपि च बका ध्यानैकनिष्ठाः सदा
निर्द्वन्द्वा निभृताश्च बिभ्रति न ते यादोभिरेवोदरम् ॥

यैर्जीवन्ति सितच्छदा न दुरितं कस्यापि यत्संग्रहे
रोचन्ते न हि ते मृणालवलयाः कस्मै प्रभूता अमी ।
अप्यासायमुपोष्य मीनपृथुकैर्युक्त्या महत्यार्जितै-
रेकद्वैरपि तृप्तिमेति परमां हिंसोपलब्धैर्बकः ॥ ८१ ॥

अस्पृश्योऽस्तु मलीमसोऽस्त्वनियताहारोऽस्त्वतोऽप्युद्भटै-
र्दोषैरस्तु परःशतैः परिवृतः काकस्ततः का क्षतिः ।
भुङ्क्ते भोज्यमुपस्थितं समुपहूयैव स्वयं बान्धवा-
न्यः सीदन्क्षुधया विचिन्तय ततो धन्यश्च पुण्यश्च कः ॥

भृत्यास्ते बिभृमस्तु तान्वयमिमे क्षुद्रा बृहन्तो वयं
जातौ पक्षवताममी तु कलकण्ठाः कालकण्ठा वयम् ।
इत्युद्भावयसे कुहूमुखकुलादुत्कर्षमेवात्मनः
कण्ठे पातयिता कदा खलु भवान्काक स्वरं पञ्चमम् ॥

केनाध्यापितमास्थितं क नु कदाधीतं क वा वर्तितं
तद्विश्राम्यतु कुत्र जातमथ कैः पुष्टं तदालोच्यताम् ।
काले सोऽपि कुहूमुखो यदि जगत्कर्णामृतं कूजति
प्राग्जन्मार्जितभाग्यवैभवमिदं कः स्तोतुमीष्टे कविः ॥

कीटः कश्चन वृश्चिकः कियदयं प्राणी कियच्चेष्टते
को भारो हननेऽस्य जीवति स वा कालं कियन्तं पुनः ।
नाम्नोऽप्यस्य कियद्विभेति जनता दूरे कियद्धावते
किं ब्रूमो गरलस्य दुर्विषहतां पुच्छाग्रशूकस्पृशः ॥८५॥

किं चन्द्रो न पुरा बभूव किमिमे वृक्षाः पुरा नाभव-
न्किं सृष्टा अधुना पिका मधुकरा अद्योदपद्यन्त किम् ।
साहंकारममुं प्रपञ्चमखिलं भोक्तुं यदा प्राणिनां
प्रासीदद्द्रुहिणस्तदा समुदभूदाश्चर्यचर्यो मधुः ॥ ८६ ॥

आयासानविचिन्तयन्नगणयँल्लाभं ततः किंचिद-
प्यम्भो मुञ्चति कीर्तिमात्रशरणो धाराधरः सर्वतः ।
तद्यत्नादुपयुज्य वर्धयतु वा दातुर्यशः शाश्वतं
मौढ्यादेतदुपेक्ष्य नाशयतु वा लोकः प्रमाणं ततः ॥

वृत्तिं वर्तयितुं निजां विषहरा गृह्णन्तु सर्वान्नरा
गृह्णन्तु क्षुधितास्तदेकविहिताहारा मयूराश्च वा ।
नाजिघ्रन्ति च ये कदापि नकुलास्ते हन्त किं कारणं
दर्शं दर्शमनुद्रवन्ति भुजगान्द्वेधा च विच्छिन्दते ॥८८॥

खादन्ति क्षुधितास्तृणानि तृषिता गृह्णन्त्यपो निर्झरे
सीदन्तो गिरिकंदरासु हरिणा येऽमी क्वचिच्छेरते ।
व्याधव्याघ्रदवानलप्रभृतयस्तेष्वेव संनाह्निन-
स्तद्वा तिष्ठतु घातयन्ति मुनयोऽप्येतान्कथं चर्मणि ॥

घ्नन्त्येकत्र तरक्षवो मृगकुलं दावा दहन्त्यन्यतो
व्याधा वीतभयाः परत्र शतशो विध्यन्ति गृह्णन्ति च ।
किं त्वं वेत्सि कथामिमां मृगपते निद्रासि कोणे क्वचि-
द्दिष्ट्या चेदवबुध्यसे शमयसि द्वित्रान्वृथा दन्तिनः ॥

दुर्धर्षोऽसि वनेचरोऽसि क इदं नेत्याह किं तु स्वतो
जानीषे न हिताहितं न खलु तज्जिज्ञाससे वान्यतः ।
तद्गृह्णन्ति नियन्त्रयन्ति निगलैस्त्वां ताडयन्त्यङ्कुशै-
रारोहन्ति च वारणेन्द्र मशकप्राया मनुष्या अपि ॥९१॥

अह्नित्रिश्चतुरम्बुभिः स्नपयसि स्वं पुष्करावर्जितै-
भुंङ्क्षे मेध्यतराणि भद्र तरुणान्यश्वत्थपत्राणि च ।
पुण्यारण्यचरोऽसि न प्रविशसि ग्रामं सकृत्कुञ्जर
ज्ञानं चेत्कियदप्युदेति न समा ब्रह्मर्षयोऽपि त्वया ॥

हन्यन्ते कति जन्तवो वनचरैर्नित्यं कति श्वापदै-
र्गृह्यन्ते कति कूटयन्त्ररचनैः क्षोणीभृतां प्रीतये ।
एतावत्यपि विप्लवे न भजसे कस्यापि दृग्गोचरं
स्वच्छन्दश्च सृगाल खेलसि पुनस्तुल्यं वनग्रामयोः ॥

अस्ति स्वर्णमयोऽद्रिरस्ति विषयः क्षुत्तृड्भरावर्जितः
सन्ति क्षीरघृताकरा जलधयः सन्ति द्रुमाः कामदाः ।
किं नस्तच्चरिताद्भुतश्रवणतः साध्यं क्षुधा ताम्यतां
दृष्टं यत्सविधे विधेहि सुमते तत्रैव सर्वं श्रमम् ॥

अस्त्यत्रैव किलार्णवे तदमृतं तत्रैव हालाहलः
सन्त्यस्मिन्मलये पटीरतरवस्तत्रैव वाताशनाः ।
यद्यद्वस्त्वभिजातमस्ति सविधे तत्तद्दुरापं नृणां
प्राग्रण्यं रसनाञ्चले करतले भाले च वेधा न्यधात् ॥

तावच्चैधितमेधितव्यमवनौ यावन्महद्भिर्द्रुमै-
श्छायाभिः कुसुमैः फलैश्च पथिकाः शक्त्या समाराधिताः ।
कालोऽयं मम जीर्यतः पतितुमित्यास्ते तरोराशये
पान्थानां च पतत्रिणां च हृदये जातोऽयमस्मिन्क्षणे ॥

दृष्टिघ्राणविषान्फणाधरपतीनष्टापि दृष्ट्या स्वयं
रोद्धुं द्रावयितुं विनाशयितुमप्यव्याहतप्रक्रमः ।
मार्जारान्नकुलांश्च किं खगपतिः साह्ये वृणोत्यात्मनः
किं प्रत्यर्थिकुलस्य वृत्तिद इति प्रद्वेष्टि वा मारुतम् ॥

अध्वन्यान्कति रुन्धते कति दृढान्भिन्दन्ति तोयाकरा-
न्केदारान्कति मज्जयन्ति कति च व्यापाटयन्ति द्रुमान् ।
वाहिन्यः क्षणलुप्तवारिविभवा वन्या अवन्यामिमा
यः सिन्धुः सकलाश्रयः स तु पुनः कुत्रेति न ज्ञायते ॥

का द्यौः किं बलिसद्म का वसुमती स्यात्सर्वमेतद्यदि
प्रत्यक्षं न भवेत्कदाचिदपि किं ते सर्वसंदर्शिनः ।
भ्राम्यन्तः प्रलपन्तु नाम विदितं मण्डूक सम्यक्त्वया
मुक्त्वेमं परमं कुकूपमितरत्किं नाम संभाव्यते ॥ ९९ ॥

त्वद्गर्भे सुखमासते फणिपतिश्रीकूर्मदिग्दन्तिनः
प्रत्यक्षा कुलभूभृतां स्थितिरपि त्वय्यम्ब सर्वंसहे ।
ये त्वेते बिभृमो वयं भुवमिति स्वं ख्यापयन्ते यशो
निःशङ्कं निरपत्रपं च तदिदं नः कर्णशूलायते ॥१००॥

भूतानां प्रभवस्थितिप्रविलयास्त्वय्येव विश्वंभरे
त्वद्गर्भे ननु ते रसातलजुषो दैत्याः फणीन्द्राश्च ये ।
त्वं सर्वैरुपजीव्यसे दिविचरैस्त्वत्तोऽपि किंचित्परं
न स्यात्स्यादपि तन्निरस्तविषयं ब्रह्म त्वमेवासि नः ॥

इति श्रीनीलकण्ठदीक्षितविरचितं
अन्यापदेशशतकं संपूर्णम् ॥

# ॥ शिवोत्कर्षमञ्जरी ॥

॥ श्रीः ॥

# ॥ शिवोत्कर्षमञ्जरी ॥

या लक्ष्मीस्त्रिजगच्छरण्यचरणा तस्याः पतिर्यच्छरो
यद्देयं निखिलैर्वदान्यनिवहैस्तद्यस्य जीर्णं धनुः ।
या संविच्छ्रुतिषु स्मृता रहसि सा यत्पादसंसेविनी
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अर्चामीति धिया यदेव कुसुमं क्षिप्त्वा जनो मुच्यते
विध्यामीति धिया तदेव विकिरन्भस्मीकृतो मन्मथः ।
इत्याभ्यन्तरवृत्तिमात्ररसिको बाह्यानपेक्षश्च यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यत्केशाग्रविलग्नमम्बु जगतां तीर्थं परं पावनं
यद्वीर्यं भुवि दक्षिणेति विदितं यज्ञेषु सर्वेष्वपि ।
श्वानो यस्य तपस्विनां च जगतां कामप्रदा धेनवः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

वक्त्राब्जेषु पितामहस्य जगतां वक्षःस्थले श्रीपतेः
सर्वाङ्गेषु शतक्रतोरपि दृढानुच्छ्रित्य जैत्रध्वजान् ।
संप्राप्तो मदनोऽपि यस्य निटिलज्योतिःपतंगायितः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥४॥

यद्दातुं कृतलोभ एव परमं धाम स्वभक्तान्पुरा
काकुत्स्थोऽप्यतिसंदधे सभुवनान्यन्यानि सृष्ट्वा तदा ।
आवेधोमशकं तदेव तृणवद्दत्तेऽविमुक्ते तु यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥५॥

सेतुं यत्र निबध्य यत्र वसुधामुद्धृत्य मग्नां पुरा
विख्यातो मधुसूदनः स जलधिर्यत्स्रोतसा पूरितः ।
सा जाह्नव्यपि यज्जटातनुशिखालम्बाम्बुलेशायिता
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

दातव्यस्त्रिदिवः प्रतिक्षणपरिक्षीणः समस्तैः सुरै-
स्तद्दानाय च ते कियत्कियदिति व्यापारयन्ते जनान् ।
अक्षय्यं पदमप्यमुत्र च सकृद्यत्कीर्तनं साधये-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ७ ॥

मन्त्रे वा क्वचिदर्थवादशकले दिष्ट्या गृहीते सकृ-
त्स्वे नाम्नि त्रिदशा वहन्ति महतीं कीर्तिं यदीयोक्तिषु ।
श्वानस्ते निगमा यदीयभवनद्वारे चरन्ति स्वतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यः सांतानिकलोकदस्त्रिजगतां कोदण्डदीक्षागुरुः
सोऽप्याहूयत मर्त्यभावभजनात्कालेन कालेन किम् ।
तादृक्षोऽपि स कस्यचिद्द्विजवटोस्त्राणाय येनाहतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ९॥

कस्मैचिद्द्विजबन्धवे कियदपि क्षीरं पुरा नाथते
दत्तो येन दयारसैकवपुषा दुग्धोद एवार्णवः ।
श्रीश्रीवल्लभकल्पपादपसुधाचिन्तामणीभिः समं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

केनास्मानतिशेरते दिविचराः श्रुत्या गृहीता हि ते
किं नास्मान्श्रुतिराह तानपरधा ब्रूते किमस्मान्स्वकान् । ×
सर्वे चेत्पशवो वयं किमितरैः सर्वस्य यो मोचकः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

बाणो यस्य न बाणकर्म सहते चक्रे च यस्यैतयो-
रेकं चक्रकुलप्रतीपमितरच्चक्रानुकूलक्रियम् ।
ज्या तु ज्यां शिरसा बिभर्ति भुवने भूतो न सूतः क्वचि-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

क्रत्वात्मा पुरुषः क्रतुः क्रतुभुजो वक्ता क्रतूनां क्रतो-
राधारः क्रतुकालकल्पनपरौ सर्वेऽप्यमी संहृताः ।
यस्यातिक्रमतः सह क्रतुकृता भ्रष्टाश्च नष्टाः क्षणा-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

आरोढुं वरमौपवाह्यमपहर्तुं सुन्दरीः कन्यका
भोक्तुं भोगमुपस्थितं सुखमलंकर्तुं च रत्नैस्तनुम् ।
संनह्यन्त्यमृतान्धसो हि शमिते येनैव हालाहले
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वं वासो दशधा विभज्य वितरन्नेकैकखण्डं पुरा
यश्चक्रे दश पाकशासनहुताशादीन्दिशामीश्वरान् ।
यद्भिक्षाशनभाक्सदा त्रिजगतामन्नं प्रदात्री शिवा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वच्छन्दं चरतो हि यस्य चरणाङ्गुष्ठाग्रसंपादिता
रेखा दीव्यति हेतिराजपदवीं प्राप्ता जगद्विश्रुता ।
लब्धा दैत्यभिदा तपोभिरुपदीकृत्य स्वमप्यायुधं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

बाणं काञ्चन बाणकोणमितरा बाणस्य मूलं परा
यन्तारं कतिचिद्रथाङ्गमितराः शिष्टाः पुनः स्वामिनम् ।
इत्थं संस्तुवते चिरंतनगिरः साक्षात्प्रणम्यापि यं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

प्राचीनेत्यधुनातनीति भुवने वाङ्नाम या यावती
ताः सर्वाः परितः परीत्य चरणे यस्यायतीर्विश्रमम् ।
शृण्वन्नङ्गदतां गतः फणिपतिः शब्दागमं व्याकरो-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

गान्धर्वागमदेशिकौ तनुभृतां यत्कर्णयोः कुण्डले
यत्पादाङ्गदनिर्मितं भुवि महाभाष्यं किल ख्यायति ।
पुण्यं पापमिति व्यवस्थितिरियं यद्वाहहेषास्वनः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

ध्यात्वा वर्षगणान्बहून्विरचितं यत्नेन यद्वेधसा
यच्छौरिर्बिभरांबभूव बहुधा भृत्वा च मृत्वा स्वयम् ।
तल्लोकत्रयमीषदुल्लसति यच्चक्षुःस्फुलिङ्गे हुतं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वामीति स्वमिति क्षराक्षरतया शब्दार्थभावेन वा
जीवब्रह्मतया जडाजडतया स्त्रीपुंसभावेन वा ।
द्वेधा भिन्नमिदं हि यस्य वपुषः सव्यापसव्ये विदुः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यल्लाभाय पुरा कियद्भिरमरैः सिन्धौ कियद्व्यापृतं
लेभे यत्परिपोषणेन कियतीं कीर्तिं रमावल्लभः ।
यच्चूडाकुसुमक्षरन्मधुरसस्रोतःकणः सा सुधा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यः स्रष्टा जगतां यतोऽयमभवत्तद्यस्य नाभेरभू-
च्छेते यत्र स तच्च यश्चुलुकयांचक्रे सहान्यैः क्षणात् ।
तादृक्षाः शतशः पुराणमुनयो यच्छिष्यवर्गे स्थिताः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

निर्व्यापारदशैव यस्य जगतीनिर्वाहधौरंधरी
मन्दस्मेरमुखाब्जतैव परमो यस्य त्विषां निग्रहः ।
नित्यं यस्य च मौनमेव निखिलं छिन्त्ते सतां संशयं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

दत्ता श्रीरिषवे सिसाधयिषवे वासो गृहीतं सुरैः
सूताय व्ययिता गिरश्च किमितो दातास्म्यहं केवलः ।
इत्यालोच्य दयानिधिः कलयते कैवल्यमेवार्थिनां
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥२५॥

शारीरः पृथिवी रवीन्दुदहना वायुर्वियत्तोयमि-
त्यष्टाभिश्चिदचिद्गणैः परिवृतं विश्वं न तस्येति यः ।
विश्वं विश्वविलक्षणः प्रभविता विश्वस्य विश्वाधिकः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

शब्दग्राममयी यदीयगृहिणी ख्याता यदीयं वपु-
स्त्रैलोक्यं जडचेतनाष्टकमयं यद्‌घ्राणगुप्तं जगत् ।
सर्वासां दयितो गिरां सकललोकात्मा च विश्वेश्वरः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यज्जातीयकणाङ्कितानमहिं जीर्णं कमप्यावस-
न्पार्श्वस्थापितपन्नगाशनपतिर्जागर्ति नित्यं हरिः ।
यत्कण्ठाभरणायितस्त्रिजगतीभीमः स हालाहलः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अन्योन्यश्वसिताशनैः फणधरैराविश्य सत्त्वान्बहि-
र्भुञ्जानैः परिचारकैस्तृणगणैरानन्दिना नन्दिना ।
भिक्षान्नोपचितैश्च दारतनयैः पुष्णाति विश्वानि यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

केयूराङ्गदहारकुण्डलकटीसूत्रोपवीतीभव-
द्भोगीन्द्रोद्भटफूत्कृतिव्यतिकरोन्मृष्टाङ्गरागो मुहुः ।
संवर्तोपचितैस्त्रिलोकभसितैर्भूयोपलिप्येत यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

सर्वश्चेतनवर्ग एष पशुतामस्यानुमेने स्म य-
स्तेषामेष पतिः प्रभुर्नियमने निर्मोचने च स्वतः ।
इत्याम्नायगिरः स्तुवन्ति बहुशः शाखासु सर्वासु यं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यच्छूलं गतसारमित्युपददे चक्रं जिघृक्षुर्हरि-
स्तत्खण्डो निहितस्तु येन दनुजे तेनापि दुर्निग्रहः ।
निर्जेतुं लवणं प्रतीक्ष्य विरहं शक्त्याभवत्सर्वदा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नाम्ना मां श्रुतिरग्रहीदिति सुराः ख्यातिं लभन्ते परां
तं वेदाहमिति श्रुतिः कथितवत्युत्सिच्यते माधवः ।
ता यद्दोरिषुधन्वमन्युषु नमोवाकान्वहन्ते शतं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

सर्गश्च प्रतिसंचरश्च जगतां यत्पक्ष्मणी संश्रितौ
शास्त्राणि श्रुतयोऽपि वा यदधरस्पन्दं प्रतीक्ष्यासते ।
बन्धो मोक्ष इति द्वयं तनुभृतां यस्याक्षिकोणे स्थितं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

शक्त्यर्थं विनिवेशयामि परिगृह्णीतेत्युपच्छन्दिताः
संभूयापि वयं तदर्थवहने न स्मः समर्था इति ।
जग्मुः प्रागमराः शरादिविधया यस्य स्वयं शेषतां
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यानब्धौ विनिमज्ज्य मीनवपुषा शौरिश्चिरायावह-
 द्यस्योद्धारणमेव कर्म महतां माहात्म्यमुद्धुष्यते ।
यानद्यापि विधिर्बिभर्ति वदनैस्ते यं वहन्त्यागमाः
 स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

जेतुं त्रीणि पुराणि येन सहसारूढे धरित्रीरथे
 वेदाश्वेषु च भग्नजानुषु वृषो भूत्वा प्रयास्यन्हरिः ।
वोढुं तेन रथं शशाक विधृतं शेषात्मनापि स्वयं
 स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अम्बा यद्गृहमेधिनी त्रिजगतां शब्दान्तराण्यन्तरा
 संत्यज्योपपदं वदन्ति च जना एकं यमेवेश्वरम् ।
मुक्त्वा च प्रतियोगिनं वदति यं नूनं कुमारं श्रुतिः
 स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

विश्वं मुञ्च बधान चेति हि परा शक्तिर्यदाज्ञापिता
 ज्ञानेच्छाकृतिशक्तिषु स्वयमिमं विन्यस्य सर्वंभरम् ।
आस्तेऽनुत्तरसारमस्य परमानन्दानुसंधायिनी
 स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

उन्मीलच्चतुरस्रविंशतिशतव्यर्णात्मना संख्यया
निर्भक्तैर्भुवनैः सनेतृभिरभिव्याप्तं कलापञ्चकम् ।
यत्कोट्यंशपराख्यशक्तिकणिकालेशस्य लेशायितं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यस्यानन्दमहार्णवस्य कणिका या कापि विद्यानिल-
व्याधूता शतधा विभिद्य भुवनं व्याप्ता श्रुतीनां गणैः ।
ब्रह्म त्वं तदसीति वादमुखरैरद्यापि चान्विष्यते
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

श्रेयः संसरतां किमस्ति परमं नामापवर्गार्चना-
द्वत्तानामधिको न कश्चन गुणोऽस्त्यस्माद्धियां गोचरः ।
तद्यद्दर्पणसंप्रसादसुलभं नालं यदीयस्तुतौ
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नष्टे स्थावरजङ्गमे शतधृतौ नष्टे जगत्स्रष्टरि
व्याप्ते दैत्यरिपौ हरेण विहरत्यस्मिन्महेशात्मना ।
अन्तर्भावयितुं स्वयं तमपि यस्येमे गणाः साक्षिणः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नाशव्याप्यममङ्गलं तदितरं माङ्गल्यमेवं स्थिते
नश्यद्दैवतधारितैरलमलंकारैरभव्यैरिति ।
नित्यैर्भस्मभिरेव भूषयति यः स्वाङ्गं जगन्मङ्गलं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

गङ्गाम्भःपरिशोषणं स्मरमदोच्छेदो जगद्दाह इ-
त्याद्यं निग्रहवैशसं कलयते कण्ठादुपर्येव यः ।
अन्तः संततमीहते तु शिवमाकीटं जगन्मात्रके
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अभ्यर्चन्ति यमामनन्ति यमनुध्यायन्ति यं संततं
गीर्वाणाः फणिनो नरा इति किमत्याश्चर्यमाचक्ष्महे ।
यो देवः स्वयमित्यसौ शिवमनुध्यायञ्शिवत्वं गतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यास्वप्सु द्रुहिणोऽजनिष्ट धरणौ यत्रावतारो हरे-
र्लिल्ये यत्र हुताशने त्रिजगतां माता विदेहात्मजा ।
तद्भूतत्रयमप्यभूदचतुरं यत्तेजसो धारणे
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यद्धर्मानुचिकीर्षया प्रववृते भिक्षाश्रमोऽनुत्तमो
यद्दास्यव्रतलाञ्छनं परमिति ख्याता विभूतिः श्रुतौ ।
यत्सूक्तिश्रवणेच्छया सुकृतिनो मुञ्चन्ति काश्यामसू-
न्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यत्सारथ्यपदश्रुतेः शतधृतेरायुः परार्धाधिकं
शौरेर्यं प्रति मार्गणत्वमयतो जागर्ति लक्ष्मीः स्थिरा ।
यत्पादाश्रयिणः फणाधरपतेर्वाचः प्रथन्ते परा-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

पारम्ये निगमागमाः परमसौलभ्ये पिशाचादयो
वाञ्छाधीनपदार्पणे स भगवान्वैयाघ्रपादो मुनिः ।
सर्वागःसहनेऽन्धकश्च दनुजो यस्य स्थिताः साक्षिणः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

साराः शब्दकुलस्य येन निगमा वाहा इति स्वीकृताः
सारावद्रिषु कार्मुकं गृहमिति द्वौ हेमरूप्यौ हृतौ ।
सारो वारिषु जाह्नवीति विधृता भक्तानुकम्पाच्छला-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

भूमिर्भ्राम्यति बुद्ध एव मरुतः प्रत्यग्भ्रमोऽप्यद्भुतो
भ्राम्यन्त्येव सहाश्रयेण यदि वा ज्योतींषि सर्वाण्यपि ।
आवर्तोऽयमपां भ्रमः परिचिता मूर्तिर्हरस्याष्टमी
या सास्त्यप्पयदीक्षितो जयति सा मूर्तिर्निरस्तभ्रमा ॥

इति श्रीनीलकण्ठदीक्षितविरचिता

शिवोत्कर्षमञ्जरी संपूर्णा ॥

# Works by the same Author.

---

**SIVALILARNAVA :** A Mahakavya in 22 cantos, with Eight half-tone and coloured illustrations and with an Introduction on "Nilakantha Dikshita and his contemporaries" by T. S. Kuppuswamy Sastrigal of Tanjore.

Cr. 8vo. Pp.48—487. Cloth bound Gilt.

***Rs. 2-4.*** Postage Extra.

## IN THE PRESS.

**NILAKANTHAVIJAYACHAMPU**

**GANGAVATARANA**

**and NALACHRITRAM** — *A Drama.*